# श्री साईंबाबा
## की
# आराधना

प्रकाशक- श्रीमती माधुरी सिंह, प्रबन्ध न्यासी
श्री साईंबाबा कर्मयोगभक्तिज्ञान संस्थान,
जे ४४, आशियाना कॉलोनी लखनऊ, उत्तरप्रदेश ।

संकलन- चन्द्र प्रकाश सिंह, न्यासी ।

**(कर्मकांड पूजा मन को परिष्कृत करके सत्कर्म करने के लिए उत्प्रेरित करती है।सत्कर्म से सौभाग्य उदित होता है।फिर जीवन सरल , सुखमय व सफल होने लगता है।)**

वंदनम् :-सर्व प्रथम देवी देवताओं का वंदन करके सद्गुरु के चरणों का स्मरण करें ।

।।श्री गणेशाय नमः। श्री सरस्वत्यै नमः ॥ श्री सद्गुरूचरणकमलेभ्यो नमः ।। ॐ भगवते श्री साईं नाथाय नमः।।

मङ्गलाचरणम्:- सर्व कल्याण हेतु।

।। ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा ग्वंग् सस्तनूभिर्व्यशेमहि देवहितं यदायुः ।।

आचमनम्:- दाहिने हाथ में जल लेकर निम्न मंत्र से आचमन करें।

ॐ केशवाय नमः । ॐ नारायणाय नमः । ॐ माधवाय नमः ।

आचमन के पश्चात् दाहिने हाथके अंगूठे के मूलभागसे 'ॐ हृषीकेशाय नमः, ॐ गोविन्दाय नमः' कहकर ओठों को पोंछ लें।

पवित्री करणम्:- बाएँ हाथ की अंजलि में जल ले कर दाहिने हाथ की अंजलि से ढक कर निम्न मंत्र से शुद्ध करके तीन बार अपने ऊपर छिड़कें ।

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।

यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

ॐ पुनातु पुण्डरीकाक्षः, पुनातु पुण्डरीकाक्षः, पुनातु।

पवित्री धारणम्:- निम्न मंत्र से पवित्री धारण करें।

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः, प्रसव उत्पुनाम्यच्छिद्रेण, पवित्रेण सूर्यस्य रश्मिभिः।

तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्।।

**शिखा वंदनम् :-** बाएँ अंजलि में जल लेकर दाहिने हाथ की पाँचो अंगुलियों को जल में डुबोकर शिखा स्थान पर रखें।

ॐ चिद्रूपिणि महामाये, दिव्यतेज: समन्विते।

तिष्ठ देवि शिखामध्ये, तेजोवृद्धिं कुरुष्व मे॥

**प्राणायामम् :-** निम्न मंत्र के साथ अनुलोम -विलोम प्राणायाम करें।

ॐ भूः ॐ भुवः ॐ स्व: ॐ महः, ॐ जनः, ॐ तपः, ॐ सत्यम्। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ॐ आपोज्योतीरसोऽमृत, ब्रह्म भूर्भुव: स्व: ॐ।।

**चन्दन धारणम्:-**

ॐ चन्दनस्य महत्पुण्यं, पवित्रं पापनाशनम्।

आपदां हरते नित्यं, लक्ष्मीस्तिष्ठति सर्वदा।।

**ज्योति प्रज्वलनम्:-** दीपक जला कर निम्न मंत्र से तीन बार जल घुमाएँ और हाथ धो लें।

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।।

**दीपक वंदनम्:-**

शुभं करोतु कल्याणमारोग्यं धनसम्पदा।

शत्रुबुद्धिविनाशाय च दीपज्योतिर्नमोऽस्तु ते ॥

**पृथ्वी पूजनम्:-** जल, पुष्प अक्षत व चंदन ले कर के पृथ्वी का स्पर्श करें।

ॐ पृथ्वि ! त्वया धृता लोका, देवि ! त्वं विष्णुना धृता।

त्वं च धारय मां देवि ! पवित्रं कुरु चासनम् ।।

**यज्ञोपवीत धारणम्:-**

ॐ यज्ञोपवीतं परमं पवित्रं, प्रजापतेर्यत्सहजं पुरस्तात्।

आयुष्यमग्रयं प्रतिमुञ्च शुभ्रं , यज्ञोपवीतं बलमस्तु तेजः ।।

**जीर्णोपवीत विसर्जनम्-**

ॐ एतावद्दिनपर्यन्तं, ब्रह्म त्वं धारितं मया।

जीर्णत्वात्ते परित्यागो, गच्छ सूत्र यथा सुखम्॥

**स्वस्त्ययनम्:-**

अंजलि में अक्षत, पुष्प आदि ले कर निम्न मंत्रों से स्वस्ति वचन करें।

ॐ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः । देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ।। देवानां भद्रा सुमतिर्रीजूयतां देवाना ग्वंग् रातिरभि नो निवर्तताम् । देवानां ग्वंग् सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ।। तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्त्रिधम्। अर्यमणं वरुण ग्वंग् सोममश्विना सरस्वती नः सुभगा मयस्करत् ।। तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः । तद् ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥ तमीशानं जगतस्तस्थुषस्पतिं धियजिं न्वमवसे हूमहे वयम्। पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ।। स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।। पृषदश्वा मरुतः पृश्निमातरः । शुभं यावानो विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह।। भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा ग्वंग् सस्तनूभिर्व्यशेमहि देवहितं यदायुः ।। शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः।। आदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्च जना अदितिर्जातपदितिर्जनित्वम् ।। (शु. य. २५ । १४-२३) ॥ॐ पयः पृथिव्यां पयऽ ओषधीषु , पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ १८-३६।।ॐ विष्णो रराटमसि विष्णोः, श्नप्त्रे स्थो विष्णोः, स्यूरसि विष्णोर्धुवोऽसि, वैष्णवमसि विष्णवे त्वा॥ ५.२१ ।।ॐ अग्निर्देवता वातो देवता, सूर्यो देवता चन्द्रमा देवता, वसवो देवता रुद्रा देवता,ऽऽदित्या देवता मरुतो देवता, विश्वेदेवा देवता, बृहस्पतिर्देवतेन्द्रो देवता, वरुणो देवता॥ १४.२० ।।ॐ द्यौः शान्तिरन्तरिक्ष ग्वंग् शान्तिः, पृथिवी शान्तिरापः, शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः, शान्तिब्रह्म शान्तिः, सर्व ग्वंग् शान्तिः, शान्तिरेव शान्तिः, सा मा शान्तिरेधि ।। ३६.१७।। यतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ।।३६ -२२।। ॐ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्नऽ आ सुव ।।ॐ शान्तिः शान्तिः, शान्तिः ।।सर्वारिष्टसुशान्तिर्भवतु ।।३०-३।।

श्रीमन्महागणाधिपतये नमः । लक्ष्मीनारायणाभ्यां नमः । उमामहेश्वराभ्यां नमः । वाणीहिरण्यगर्भाभ्यां नमः । शचीपुरन्दराभ्यां नमः । मातृपितृचरणकमलेभ्यो नमः । इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः। ग्रामदेवताभ्यो नमः । वास्तुदेवताभ्यो नमः । स्थानदेवताभ्यो नमः । सर्वेभ्यो देवेभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः । ॐ सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः।

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो विनायकः ।। धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ।। ।।३।।

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । सङ्ग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्। येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं देवबलं तदेव लक्ष्मीपते तेऽघ्रियुगं स्मरामि ।।

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ।।

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ।।

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।।

स्मृतेः सकलकल्याणं भाजनं यत्र जायते । पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ।।
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः । देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ।।

विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम् । वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ।।
वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।।

गणेशाम्बिकाभ्यां नमः ।।

हाथमें लिये अक्षत-पुष्पको गणेशाम्बिकापर चढ़ा दे। इसके बाद दाहिने हाथमें जल, अक्षत और द्रव्य लेकर संकल्प करे।

**संकल्पम्-** ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य, अद्य श्रीब्रह्मणोन्हि द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे, वैवस्वतमन्वन्तरे, भूर्लोके, जम्बूद्वीपे, भारतवर्षे, भरतखण्डे, आर्यावर्त्तैकदेशान्तर्गते, ..... क्षेत्रे,... विक्रमाब्दे ,.... संवत्सरे, मासानां मासोत्तमेमासे..... मासे ..... पक्षे ..... तिथौ ..... वासरे ...... गोत्रोत्पन्नः ...... नामाऽहं सत्प्रवृत्ति-संवर्द्धनाय, दुष्प्रवृत्तिउन्मूलनाय, लोककल्याणाय, आत्मकल्याणाय, वातावरणपरिष्काराय, उज्ज्वलभविष्यकामनापूर्तये च प्रबलपुरुषार्थ करिष्ये, अस्मै प्रयोजनाय च कलशादि-आवाहितदेवता-पूजनपूर्वकम् .यज्ञ .. कर्मसम्पादनार्थं सङ्कल्पम् अहं करिष्ये।

न्यासः-

बायें हाथ में जल लेना, दाहिने हाथ की पाँचों अंगुलियों को मिला कर जल में डुबोयें । अब जहाँ-जहाँ मन्त्रोच्चार के संकेत हों, वहाँ पहले बायीं ओर फिर दाहिनी ओर के क्रम से स्पर्श करते हुए हर बार में एकत्रित अँगुलियाँ डुबोते और स्पर्श करते चलना न्यास कर्म है।

ॐ वाङ् मे आस्येऽस्तु । (मुख को)

ॐ नसोमें प्राणोऽस्तु । (नासिका के दोनों छिद्रों को)

ॐ अक्ष्णोर्मे चक्षुरस्तु । (दोनों नेत्रों को)

ॐ कर्णयोर्मे श्रोत्रमस्तु । (दोनों कानों को)

ॐ बाह्वोर्मे बलमस्तु । (दोनों भुजाओं को)

ॐ ऊर्वोर्मे ओजोऽस्तु । (दोनों जंघाओं को)

ॐ अरिष्टानि मेऽङ्गानि, तनूस्तन्वा मे सह सन्तु । (समस्त शरीर)

अङ्गन्यासः :- इंगित अंगों को स्पर्श करना है।

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमि ग्वंग् सर्वत स्मृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ।। (बायाँ हाथ)

पुरुष एवेद ग्वंग् सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ।। (दाहिना हाथ)

एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।। (बायाँ पैर)

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः । ततो विष्वङ् व्यक्रामत्साशनानशने अभि ।। (दाहिना पैर)

ततो विराडजायत विराजो अधि पूरुषः ।। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ।। (वाम जानु)

तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम्। पशुंस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ।। (दक्षिण जानु)

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे । छन्दा ग्वंग् सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।। (वाम कटिभाग)

तस्मादश्वा अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ।।(दक्षिण कटिभाग)

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये ॥(नाभि)

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते ॥ (हृदय)

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्या ग्वंग् शूद्रो अजायत ।। (वाम बाहु)

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।। (दक्षिण बाहु)

नाभ्या आसीदन्तरिक्ष ग्वंग् शीष्र्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २ अकल्पयन् ।।(कण्ठ)

यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।। (मुख)

सप्तास्यासन परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाऽ, अबध्नन् पुरुषं पशुम् ।।(आँख)

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।। (मूर्धा)

**घण्टा-पूजनम्:-** घण्टा पर चंदन से ॐ लिख कर निम्नलिखित मन्त्र पढ़कर प्रार्थना करें ।

आगमार्थं तु देवानां गमनार्थं च रक्षसाम् ।

कुरु घण्टे वरं नादं देवतास्थानसंनिधौ ॥

प्रार्थनाके बाद घण्टाको बजाये और यथास्थान रख दें ।

**शंख पूजनम्:-** शङ्ख में दूब व तुलसी डालकर जलसे भर देव निम्नलिखित मन्त्र पढ़कर शङ्ख में तीर्थो का आवाहन करे।

पृथिव्यां यानि तीर्थानि स्थावराणि चराणि च । तानि तीर्थानि शंखेऽस्मिन् विशन्तु ब्रह्मशासनात् ॥

फिर चंदन व पुष्प अर्पित कर के निम्न मंत्र से पूजा करें।

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे। निर्मितः सर्वदेवैश्च पाञ्चजन्य ! नमोऽस्तु ते ।।

**गणेशाम्बिका पूजनम्:-** हाथ में अक्षत लेकर **ध्यान** करें ।

गणपति - गजाननं भूतगणादिसेवितं कपित्थजम्बूफलचारुभक्षणम्।

उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम् ।।

भगवती गौरी- नमो देव्यै महादेव्यै शिवायै सततं नमः ।

नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥

श्रीगणेशाम्बिकाभ्यां नमः, ध्यानं समर्पयामि ।

**आवाहनम्:-**

गणपति -ॐ गणानां त्वा गणपति ग्वंग् हवामहे प्रियाणां त्वा प्रियपति ग्वंग् हवामहे निधीनां त्वा निधिपति ग्वंग् हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम्।।

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहिताय गणपतये नमः, गणपतिमावाहयामि, स्थापयामि, पूजयामि च।

हाथ के अक्षत गणेशजी पर चढ़ा दे। फिर अक्षत लेकर गणेशजी की दाहिनी ओर गौरी जी का आवाहन करे।

भगवती गौरी:-

ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां
काम्पीलवासिनीम् ॥

ॐ भूर्भुवः स्वः गौर्यै नमः, गौरीमावाहयामि, स्थापयामि, पूजयामि च ।

## प्रतिष्ठा:-

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ग्वंग् समिमं दधातु । विश्वे देवास इह मादयन्तामो३ प्रतिष्ठ ।।

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च । अस्यै देवत्वमर्चायै मामहेति च कश्चन ।।

गणेशाम्बिके सुप्रतिष्ठिते वरदे भवेताम् । प्रतिष्ठापूर्वकं आसनार्थे अक्षतान् समर्पयामि।
गणेशाम्बिकाभ्यां नमः। (आसनके लिये अक्षत समर्पित करे)।

## पाद्यम्:-

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः पाद्यं समर्पयामि।।

अर्घ्यम्:-

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः अर्घ्यं समर्पयामि।।

## आचमनीयम्:-

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः आचमनीयं समर्पयामि।।

## पञ्चामृतस्नानम् :-

पञ्चामृतं मयानीतं पयो दधि घृतं मधु ।

शर्करया समायुक्तं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, पञ्चामृतस्नानं समर्पयामि।

## शुद्धोदकस्नानम् :-

गङ्गा च यमुना चैव गोदावरी सरस्वती ।नर्मदा सिन्धुकावेरी स्नानार्थं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, शुद्धोदकस्नान समर्पयामि । (शुद्ध जलसे स्नान कराये।)

शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।।

## वस्त्रम् :-

शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् । देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, वस्त्रं समर्पयामि ।

वस्त्रान्ते आचमनीयं जलं समर्पयामि ।

## उपवस्त्रम्:-

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, उपवस्त्र (उपवस्त्राभावे रक्तसूत्रम् समर्पयामि) ।

उपवस्त्रान्ते आचमनीयं जलं समर्पयामि।

## यज्ञोपवीतम्:-

ॐ भूर्भुवः स्वः गणेशामिकाभ्यां नमः, यज्ञोपवीतं समर्पयामि ।

यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि ।

## चन्दनम्:-

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।

विलेपनं सुरश्रेष्ठ ! चन्दनं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, चन्दनानुलेपन  समर्पयामि ।

## अक्षतम्:-

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, अक्षतान् समर्पयामि ।

## पुष्पमाला:-

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, पुष्पमाला समर्पयामि ।

## दूर्वा:-

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, दूर्वांकुरान समर्पयामि।

## सिन्दूरम्:-

सिन्दूरं शोभनं रक्तं सौभाग्य सुखवर्धनम् । शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, सिन्दूरं  समर्पयामि ।

## धूपम्:-

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, धूपमाघ्रापयामि।

## दीपम्:-

ॐ अग्निज्योतिज्योतिरग्निः स्वाहा सूर्यो ज्योतिज्योतिः सूर्यः स्वाहा । अग्निर्वर्चो ज्योतिर्वचः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा । ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, दीपं दर्शयामि ।

## हस्त प्रक्षालनम् -

तदंतर हस्त प्रक्षालन "ॐ हषीकेशाय नमः"।

## नैवेद्यम्:-

जलसे चतुष्कोण घेरा लगाकर भगवान के आगे नैवेद्य रखें।

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ समानाय स्वाहा।

ॐ ब्रह्मणे नमः।मध्ये पनीयम् समर्पयामि। पुनः नैवेदयम् निवेदयामि ।

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ समानाय स्वाहा।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, नैवेद्यं निवेदयामि ।

नैवेद्यान्ते आचमनीयं जलं समर्पयामि ।

## ऋतुफलम्:-

ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व हसः ।।

फलान्ते आचमनीयं जलं समर्पयामि ।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, ऋतुफलानि समर्पयामि।

## उत्तरापोऽशनम्:-

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः उत्तरापोऽशनार्थे जलं समर्पयामि।

## करोद्वर्तनम्:-

चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम्।।

करोद्वर्तनकं देव गृहाण परमेश्वर ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, करोद्वर्तनकं चन्दनं समर्पयामि ।

## ताम्बूलम्:-

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्।

एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, मुखवासार्थम् एलालवंगपूगीफलसहितं ताम्बूलं समर्पयामि ।

## द्रव्यदक्षिणाः-

ॐ हिरण्यगर्भः समवर्तताग्ने भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविण विधेम ।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः,द्रव्यदक्षिणां समर्पयामि ।

## आरार्तिकम् -

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम्।

आरातिकमहं कुर्वे पश्य मे वरदो भव ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, आरार्तिकं समर्पयामि ।

तदंतर जल तीन बार घुमाकर गिराएँ।

## पुष्पाञ्जलिम्-

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।।(यजु:३१ ।

पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, पुष्पाञ्जलिं समर्पयामि।

## प्रदक्षिणाः-

यानि कानि च पापानि जन्मान्तरकृतानि च ।

तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, प्रदक्षिणां समर्पयामि।

**विशेषार्घ्यम्-** ताम्रपात्रमें जल, चन्दन, अक्षत, फल, फूल, दूर्वा और दक्षिणा रखकर अर्घ्यपात्रको हाथ में लेकर निम्नलिखित मन्त्र पढ़े।

रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक।

भक्तानामभयं कर्ता त्राता भव भवार्णवात् ।।

अनेन सफलार्येण वरदोऽस्तु सदा मम ।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, विशेषार्घ्यं समर्पयामि ।

## प्रार्थना :-

विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ।

नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ।।

भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय ।

विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते ।।

नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः, नमस्ते रुद्ररूपाय करिरूपाय ते नमः ।
विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे, भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ।।

त्वां विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति फलप्रदेति ।

विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव ।।

त्वं वैष्णवी शक्तिरनन्तवीर्याविश्वस्य बीजं परमासि माया ।

सम्मोहितं देवि समस्तमेतत् त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, प्रार्थनापूर्वकं नमस्कारान् समर्पयामि ।

गणेशपूजने कर्म यन्न्यूनमधिकं कृतम्। तेन सर्वेण सर्वात्मा प्रसन्नोऽस्तु सदा मम ।।

अनया पूजया गणेशाम्बिके प्रीयेताम्, न मम ।

## कलश-स्थापनम्:-

कलश में रोलीसे स्वास्तिकका चिह्न बनाकर गलेमें तीन धागावाली मौली लपेटे और कलश को एक ओर रख ले। कलश स्थापित किये जानेवाली भूमि अथवा पाटेपर कुङ्कम या रोलीसे अष्टदलकमल बनाकर निम्न मन्त्रसे भूमिका स्पर्श करे।

## भूमि स्पर्शम्:-

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्यभुवनस्य धर्त्री ।

पृथिवीं यच्छ पृथिवीं द्रि ग्वंग् ह पृथिवीं मा हि ग्वंग् सीः ।।

निम्नलिखित मन्त्र पढ़कर पूजित भूमिपर सप्तधान्य' अथवा गेहूँ, चावल या जौ रख दे-

## धान्यप्रक्षेपम्:-

ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वो दानाय त्वा व्यानाय त्वा। दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रति गृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोऽसि ॥

इस धान्यपर निम्नलिखित मन्त्र पढ़कर कलशकी स्थापना करे

## कलश स्थापनम्:-

ॐ आ जिघ्र  कलशं मह्या त्वा विशन्त्विन्दवः ।

पुनरूर्जा नि वर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः ।।।।९।।

## कलशे जलम्:-

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो

वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि

वरुणस्य ऋतसदनमा सीद ।।

## कलशे चन्दनम्:-

ॐ त्वां गन्धर्वा अखनस्त्वामिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत ।।

## कलशे सर्वौषधिम्:-

ॐ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं  पुरा। मनै नु बभ्रूणामह ग्वंग् शतं  धामानि सप्त च ॥

## कलशे दूर्वा :-

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्वे प्र तनु सहस्रेण शतेन च ॥

कलशोपरि पञ्चपल्लव: :-

ॐ अश्वत्थे वो निषदनं पर्णे वो वसति  ता।। गोभाज इकिलासथ यत्सनवथ पूरुषम् ।।

## कलशे कुशम्:-

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण

पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य

यत्कामः पुने तच्छकेयम् ।।

## कलशे सप्तमृत्तिकां :-

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः।

## कलशे सुपारीं :-

ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।

बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व-हसः ।।

## कलशे पञ्चरत्नानि:-

ॐ परि वाजपतिः कविरग्निहव्यान्यक्रमीत् ।

दधद्रत्नानि दाशुषे।

## कलशे द्रव्यं :-

ॐ हिरण्यगर्भः समवर्तताने भूतस्य जातः पतिरेक

आसीत् । स दाधार पृथिवीं द्यामुतेमा कस्मै देवाय हविषा विधेम ॥

## कलशोपरि वस्त्रं :-

ॐ सुजातो ज्योतिषा सह शर्म वरूथमाऽसदत्स्वः ।

वासो अग्ने विश्वरूप :सं व्ययस्व विभावसो ॥

## कलशोपरि पूर्णपात्रम्:-

ॐ पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत । वस्नेव विक्रीणावहा इषमूर्ज शतक्रतो ।

## कलशोपरि नारियलम्:-

ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।

बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व हसः ।।

## कलशे वरुणस्य ध्यानं - आवाहनं :-

ॐ तत्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।

अहेडमानो वरुणेह बोध्युरुश ग्वंग् स मा न आयुः प्र मोषीः ।।

अस्मिन् कलशे वरुणसाङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि ।

ॐ भूर्भुवः स्वः भो वरुण ! इहागच्छ, इह तिष्ठ, स्थापयामि, पूजयामि, मम पूजां गृहाण ।

"ॐ अपां पतये वरुणाय नमः"। कह कर अक्षत पुष्प कलश पर छोड़ दें।

फिर हाथ में अक्षत-पुष्प लेकर देविदेवताओं का आवाहन करें।

## कलशे देवी-देवताभ्यो आवाहनम्:-

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।

मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ।।

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।

ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।।

अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ।

अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ।।

गङ्गे च यमुने चैव गोदावरि सरस्वति ।

नर्मदे सिन्धुकावेरि जलेऽस्मिन् संनिधिं कुरु ॥

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।

आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ।।

तदंतर अक्षत पुष्प लेकर कलश की प्रतिष्ठा करें।

## प्रतिष्ठा:-

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ग्वंग् समिमं दधातु । विश्वे देवास इह मादयन्तामो ३ म्प्रतिष्ठ ।।

कलशे वरुणाद्यावाहितदेवताः सुप्रतिष्ठिता वरदा भवन्तु।

ॐ वरुणाद्यावाहितदेवताभ्यो नमः ।

यह कह कर अक्षत पुष्प कलश के पास छोड़ दें।

## ध्यानम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, ध्यानार्थे पुष्पम् समर्पयामि।

## आसनम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आसनार्थे अक्षतान् समर्पयामि।

## पाद्यम् :-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, पादयोः पाद्यं समर्पयामि ।

## अर्घ्यम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, हस्तयोरध्ये समर्पयामि ।

## स्नानीयं जलम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, स्नानीयं जलं समर्पयामि ।

स्नानान्ते आचनम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, स्नानान्ते आचमनीयं जलं समर्पयामि।

पञ्चामृतस्नानम् :-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, पञ्चामृतस्नानं सर्पयामि ।

गन्धोदक-स्नानम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, गन्धोदकस्नानं समर्पयामि।

शुद्धोदक-स्नानम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, स्नानान्ते शुद्धोदकस्नानं समर्पयामि ।

आचमनम्:-

ॐ वरुणाद्यावाहिलदेवताभ्यो नमः, शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।

वस्त्रम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, वस्त्रं समर्पयामि ।

आचमनम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, वस्त्रान्ते आचमनीयं जलं समर्पयामि ।

यज्ञोपवीतम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, यज्ञोपवीतं समर्पयामि ।

आचमनम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि।

उपवस्त्रम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, उपवस्त्र (उपवस्त्रार्थे रक्तसूत्रम्) समर्पयामि ।

आचमनम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, उपवस्त्रान्ते आचमनीयं जलं समर्पयामि।

चन्दनम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, चन्दनं समर्पयामि ।

अक्षतम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, अक्षतान् समर्पयामि ।

पुष्पम् (पुष्पमाला):-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, पुष्पं

समर्पयामि।

नानापरिमलद्रव्यम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, नानापरिमलद्रव्याणि समर्पयामि ।

सुगन्धितद्रव्यम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, सुगन्धितद्रव्यं समर्पयामि ।

धूपम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, धूपमाघ्रापयामि।

दीपम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, दीपं दर्शयामि ।

तदंतर हस्तप्रक्षालनम्।

नैवेद्यम्:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, सर्वविधं नैवेद्यं निवेदयामि ।

आचमनम् आदि:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आचमनीयं जलं , मध्ये पानीयं जलं , उत्तरापोऽशने मुखप्रक्षालनार्थे, हस्तप्रक्षालनार्थे च जलं समर्पयामि।

करोद्वर्तनम् :-

ॐ वरुणाधावाहितदेवताभ्यो नमः, करोद्वर्तनं

समर्पयामि ।

ताम्बूलम् : -

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, ताम्बूलं समर्पयामि।

(सुपारी, इलायची, लौंगसहित पान चढ़ाये।)

दक्षिणा:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, कृतायाः पूजायाः

सानुण्यार्थे द्रव्यदक्षिणां समर्पयामि । (द्रव्य-दक्षिणा चढ़ाये।)

## आरती:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आरातिक समर्पयामि ।

आरती करें ।

ॐ कदली----

## पुष्पाञ्जलि:-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, मन्त्रपुष्पाञ्जलि समर्पयामि । (पुष्पाञ्जलि समर्पित करे।)

## प्रदक्षिणा-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, प्रदक्षिणां समर्पयामि । (प्रदक्षिणा करे।)

## प्रार्थना-

देवदानव संवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ।
सांनिध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।।
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ।।
'ॐ अपां पतये वरुणाय नमः।

## नमस्कार-

ॐ वरुणाद्यावाहितदेवताभ्यो नमः, प्रार्थनापूर्वक नमस्कारान् समर्पयामि । (इस नाम-मन्त्रसे नमस्कारपूर्वक पुष्प समर्पित करे।

अब हाथमें जल लेकर निम्नलिखित वाक्यका उच्चारण कर जल कलशके पास छोड़ते हुए समस्त पूजन-कर्म भगवान् वरुणदेवको निवेदित करे।

## समर्पण-

कृतेन अनेन पूजनेन कलशे वरुणाद्यावाहितदेवताः प्रीयन्तां न मम।

## पुण्याहवाचन:-

पुण्याहवाचनके दिन आरम्भमें वरुण कलशके पास जलसे भरा एक पात्र (कलश) भी रख दे । वरुण-कलशके पूजनके साथ-साथ इसका भी पूजन कर लेना चाहिये । पुण्याहवाचनका कर्म इसीसे किया जाता है। सबसे पहले वरुणकी प्रार्थना करे।

## वरुण-प्रार्थना:-

ॐ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक ।

पुण्याहवाचनं यावत् तावत् त्वं सुस्थिरो भव ।।

यजमान अपनी दाहिनी ओर पुण्याहवाचन-कर्मके लिये वरण किये हुए युग्म ब्राहाणोंको, जिनका मुख उत्तरकी ओर हो, बैठा ले । इसके बाद जमान घुटने टेककर कमलकी कोंढ़ी की तरह अञ्जलि बनाकर सिरसे नगाकर तीन बार प्रणाम करे । तब आचार्य अपने दाहिने हाथसे स्वर्णयुक्त उस  जलपात्र (लोटे) को यजमानकी अञ्जलिमें रख दे। यजमान उसे सिर रसे लगाकर निम्नलिखित मन्त्र पढ़कर ब्राहमणोंसे अपनी दीर्घ आयुका आशीर्वाद माँगे।

## यजमान:-

ॐ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च ।

तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु ।।

यजमानकी इस प्रार्थनापर ब्राहमण निम्नलिखित आशीर्वचन बोले।

## ब्राहमण:-

अस्तु दीर्घमायुः।

अब यजमान ब्राहमणोंसे फिर आशीर्वाद माँगे।

## यजमान:-

ॐ  त्रीणि पदा वि चक्रमे विष्णुर्गोपा  अदाभ्यः । अतो धर्माणि धारयन् ।।

तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु इति भवन्तो ब्रुवन्तु ।

## ब्राहाण:-

पुण्यं पुण्याहं दीर्घमायुरस्तु।।

यजमान और ब्राह्मणोंका यह संवाद इसी आनुपूर्वी से दो बार और होना चाहिये।

**यजमान**:- यजमान प्रार्थना करें।

ब्राह्मं  पुण्यं महर्यच्च सृष्ट्युत्पादनकारकम् ।

वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ॥

भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे अमुककर्मणः पुण्याहं भवन्तो ब्रुवन्तु ।

**ब्राह्मण**:-

ॐ पुण्याहम, ॐ पुण्याहम्, ॐ पुण्याहम्।।

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।

पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।

**यजमान**:-

पृथिव्यामुद्ध्रितायां तु यत्कल्याणं पुरा कृतम्।

ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ॥

भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे अमुककर्मणः कल्याणं भवन्तो ब्रुवन्तु।

**ब्राह्मण**:-

ॐ कल्याणम, ॐ कल्याणम्, ॐ कल्याणम्।

ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः ।

ब्रह्मराजन्याभ्या ग्वंग् शूद्राय चाय च स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं  मे कामः समृध्यतामुप मादो नमतु।

**यजमान**:–

सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता ।

सम्पूर्णा सुप्रभावा च तां च ऋद्धिं ब्रवन्तु नः ॥

भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे अमुककर्मणः ऋद्धिं भवन्तो ब्रवन्तु ।

**ब्राह्मण**:-

ॐ कर्म ऋध्यताम् , ॐ कर्म ऋध्यताम् , ॐ कर्म ऋध्यताम् ।

ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम। दिवं पृथिव्याम् अध्याऽरुहामाविदाम देवांस्त्वज्योतिः।।

यजमान:-

स्वस्तिस्तु याऽविनाशाख्या पुण्यकल्याणवृद्धिदा।

विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः ॥ .

भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे अमुककर्मणः स्वस्तिं भवन्तो ब्रुवन्तु।

ब्राह्मण:-

ॐ आयुष्मते स्वस्ति, ॐ आयुष्मते स्वस्ति, ॐ आयुष्मते स्वस्ति ।

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यों अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।।

यजमान:-

मृकण्डसूनोरायुर्यद्ध्रुवलोमशयोस्तथा ।

आयुषा तेन संयुक्ता जीवेम शरदः शतम् ।।

ब्राह्मण:-

जीवन्तु भवन्तः, जीवन्तु भवन्तः, जीवन्तु भवन्तः ।

ॐ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ।।

यजमान:-

समुद्रमथनाज्जाता जगदानन्दकारिका।

हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः ॥

शिवगौरीविवाहे तु या श्रीरामे नृपात्मजे।

धनदस्य गृहे या श्रीरस्माकं सास्तु सद्मनि ॥

ब्राह्मण:-

अस्तु श्रीः, अस्तु श्रीः, अस्तु श्रीः।

ॐ मनसः काममाकूतिं वाचः सत्यमशीय पशूना ग्वंग् रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा।

यजमान:-

प्रजापतिः लोकपालो धाता ब्रह्मा च देवराट् ।

भगवाञ्छाश्वतो नित्यं स नो रक्षतु सर्वतः ॥

पश्चात् हाथमें जल लेकर छोड़ दे और कहे

भगवान् प्रजापतिः प्रीयताम्।

ब्राह्मण:-

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्त्वयममुष्य पितासावस्य पिता वय ग्वंग् स्याम पतयो रयीणा ग्वंग् स्वाहा ॥

आयुष्मते स्वस्तिमते यजमानाय दाशुषे ।

कृताः सर्वाशिषः सन्तु ऋत्विग्भिर्वेदपारगैः ।।

या स्वस्तिर्ब्रह्मणो भूता या च देवे व्यवस्थिता।

धर्मराजस्य या पत्नी स्वस्तिः शान्तिः सदा तव ।।

देवेन्द्रस्य यथा स्वस्तिर्यथा स्वस्तिर्गुरोगुहे।

एकलिंगे यथा स्वस्तिस्तथा स्वस्तिः सदा तव ।।

ॐ आयुष्मते स्वस्ति, ॐ आयुष्मते स्वस्ति, ॐ आयुष्मते स्वस्ति।२१

ॐ प्रति पन्थामपद्महि स्वस्तिगामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु।

पुण्याहवाचनकर्मणः समृद्धिरस्तु।

यजमान:-

अस्मिन् पुण्याहवाचने न्यूनातिरिक्तो यो विधिरुपविष्ट-

ब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच्च परिपूर्णोऽस्तु ।

दक्षिणा का संकल्प-

कृतस्य पुण्याहवाचनकर्मणः समृद्ध्यर्थ पुण्याह- .

वाचकेभ्यो ब्राह्मणेभ्य इमां दक्षिणां विभज्य अहं दास्ये।

ब्राह्मण- ॐ स्वस्ति।

अभिषेक:-

पुण्याहवाचनोपरान्त कलशके जलको पहले पात्रमें गिरा ले। अब अविधुर (जिनकी धर्मपत्नी जीवित हो) ब्राह्मण उत्तर या पश्चिम मुख होकर दूब और पल्लवके द्वारा इस जलसे

यजमानका अभिषेक करे। अभिषेकके समय यजमान अपनी पत्नीको बायीं तरफ कर ले। परिवार भी वहाँ बैठ जाय। अभिषेकके मन्त्र निम्नलिखित हैं।

ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः। पयस्वतीः प्रदिशः सन्तु मह्यम्।।

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमा सीद ।।

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।।
ॐ द्यौः शान्तिरन्तरिक्ष ग्वंग्  शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वे देवाः शान्तिब्रह्म शान्तिः सर्व ग्वंग् शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥

यतो यतः समीहसे ततो नो अभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः।।सुशान्तिर्भवतु।

सरितः सागराः शैलास्तीर्थानि जलदा नदाः । एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ।।

शान्तिः पुष्टिस्तुष्टिश्चास्तु। अमृताभिषेकोऽस्तु ।।

## दक्षिणा-

ॐ अद्य...कृतैतत्पुण्याहवाचनकर्मणः साङ्गता सिद्ध्यर्थं  तत्सम्पूर्णफलप्राप्यर्थं  च पुण्याहवाचकेभ्यो ब्राह्मणेभ्यो यथाशक्ति मनसोद्दिष्टां दक्षिणां विभज्य दातुमहमुत्सृजे।

## षोडशमातृका-पूजन:-

षोडशमातृकाओं की स्थापनाके लिये पूजक दाहिनी ओर सोलह कोष्ठक बनायें  । पश्चिम से पूर्वकी ओर मातृकाओंका आवाहन और स्थापन करे । कोष्ठकोंमें रक्त चावल, गेहूँ या जौ रख दे। पहले कोष्ठक में  गौरीका आवाहन होता है, अतः गौरीके आवाहनके पूर्व गणेशका भी आवाहन पुष्पाक्षतों द्वारा इसी कोष्ठक में करे। इसी प्रकार अन्य कोष्ठकोंमें भी निम्नाङ्कित मन्त्र पढ़ते हुए आवाहन करे ।

## आवाहन एवं स्थापन :-

१-ॐ गणपतये नमः, गणपतिमावाहयामि, स्थापयामि ।ॐ गौर्यै नमः, गौरीमावाहयामि, स्थापयामि।

२-ॐ पद्मायै नमः, पद्मामावाहयामि, स्थापयामि ।

३-ॐ शच्यै नमः, शचीमावाहयामि, स्थापयामि ।

४-ॐ मेधायै नमः, मेधामावाहयामि, स्थापयामि।

५-ॐ सावित्र्यै नमः, सावित्रीमावाहयामि, स्थापयामि ।

६-ॐ विजयायै नमः, विजयामावाहयामि, स्थापयामि।

७-ॐ जयायै नमः, जयामावाहयामि, स्थापयामि।

८-ॐ देवसेनायै नमः, देवसेनामावाहयामि, स्थापयामि।

९-ॐ स्वधायै नमः, स्वधामावाहयामि, स्थापयामि।

१०-ॐ स्वाहायै नमः, स्वाहामावाहयामि, स्थापयामि ।

११-ॐ मातृभ्यो नमः, मात्रि: आवाहयामि, स्थापयामि ।

१२-ॐ लोकमातृभ्यो नमः, लोकमात्रि: आवाहयामि, स्थापयामि ।

१३-ॐ धृत्यै नमः, धृतिमावाहयामि, स्थापयामि।

१४-ॐ पुष्टयै नमः, पुष्टिमावाहयामि, स्थापयामि ।

१५-ॐ तुष्टयै नमः, तुष्टिमावाहयामि, स्थापयामि।

१६-ॐ आत्मनः कुलदेवतायै नमः, आत्मनः कुलदेवता मावाहयामि, स्थापयामि।

इस प्रकार षोडशमातृकाओंका आवाहन, स्थापन कर "ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ग्वंग् समिमं दधातु । विश्वे देवास इह मादयन्तामो ३ म्प्रतिष्ठ ।।" इस मन्त्रसे अक्षत छोड़ते हुए मातृका-मण्डलकी प्रतिष्ठा करें , तत्पश्चात् निम्नलिखित नाम-मन्त्रसे गन्धादि उपचारोंद्वारा पूजन करे।

'ॐ गणेशसहितगौर्यादिषोडशमातृकाभ्यो नमः ।'

## प्रार्थना :-

गौरी पद्या शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ।।
धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता । गणेशेनाधिका ह्योता वृद्धौ पूज्याश्च षोडश ।।

## विशेष-

१-मातकाओंको यज्ञोपवीत न चढ़ाये।२-

२-नैवेद्यके साथ-साथ ।घृत और गुड़का भी नैवेद्य लगाये।

३-विशेष अर्घ्य न दे।

## फलका अर्पण-

नारियल आदि फल अञ्जलिमें लेकर प्रार्थना करें ।

ॐ आयुरारोग्यमैश्वर्यं ददध्वं मातरो मम । निर्विघ्नं सर्वकार्येषु कुरुध्वं सगणाधिपाः ।।

इस तरह प्रार्थना करनेके बाद नारियल आदि फल चढ़ाकर हाथ जोड़कर बोले -

'गेहे वृद्धिशतानि भवन्तु, उत्तरे कर्मण्यविघ्नमस्तु ।'

इसके बाद 'अनया पूजया गणेशसहितगौर्यादिषोडशमातरः प्रीयन्ताम्, न मम ।' इस वाक्यका उच्चारण कर मण्डलपर अक्षत छोड़कर नमस्कार करे।

## अग्निकोड़े चतुःषष्टियोगिनी-पूजनम्-

प्रायः षोडशमातृका-मण्डलपर ही चौंसठ योगिनियोंके आवाहन एवं पूजनादिकी भी परम्परा है। तदनुसार बायें हाथमें अक्षत लेकर दाहिने हाथसे छोड़ते हुए निम्नलिखित नाम-मन्त्र पढ़कर चौंसठ योगिनियोंका आवाहन करे।

आवाहन-

१-ॐ दिव्ययोगायै नमः, २-ॐ महायोगायै नमः, ३-ॐ सिद्धयोगायै नमः, ४-ॐ महेश्वर्यै नमः, ५-ॐ पिशाचिन्यै नमः, ६-ॐ डाकिन्यै नमः, ७-ॐ कालरात्र्यै नमः, ८-ॐ निशाचर्यै नमः, ९-ॐ कंकाल्यै नमः, १०-ॐ रौद्रवेताल्यै नमः, ११-ॐ हुँकार्यै नमः, १२-ॐ ऊर्ध्वकेश्यै नमः, १३-ॐ विरूपाक्ष्यै नमः, १४-ॐ शुष्काङ्ग्यै नमः, १५-ॐ नरभोजिन्यै नमः, १६-ॐ फटकार्यै नमः, १७-ॐ वीरभद्रायै नमः, १८-ॐ धूम्राक्ष्यै नमः, १९-ॐ कलहप्रियायै नमः, २०-ॐ रक्ताक्ष्यै नमः, २१-ॐ राक्षस्यै नमः, २२-ॐ घोरायै नमः, २३-ॐ विश्वरूपायै नमः, २४-ॐ भयङ्कर्यै नमः, २५-ॐ कामाक्ष्यै नमः, २६-ॐ उग्रचामुण्डायै नमः, २७-ॐ भीषणायै नमः, २८-ॐ त्रिपुरान्तकायै नमः, २९-ॐ वीरकौमारिकायै नमः, ३०-ॐ चण्ड्यै नमः, ३१-ॐ वाराहयै नमः, ३२-ॐ मुण्ड धारिण्यै नमः, ३३-ॐ भैरव्यै नमः, ३४-ॐ हस्तिन्यै नमः, ३५-ॐ क्रोधदुर्मुख्यै नमः, ३६-ॐ प्रेतवाहिन्यै नमः, ३७-ॐ खट्वाङ्गदीर्घलम्बोष्ठयै नमः, ३८-ॐ मालत्यै नमः, ३९-ॐ मन्त्रयोगिन्यै नमः, ४०-ॐ अस्थिन्यै नमः, ४१-ॐ चक्रिण्यै नमः, ४२-ॐ ग्राहायै नमः, ४३-ॐ भुवनेश्वर्यै नमः, ४४-ॐ कण्टक्यै नमः, ४५-ॐ कारक्यै नमः, ४६-ॐ शुभ्रायै नमः, ४७-ॐ क्रियायै नमः,४८-ॐ दूत्यै नमः, ४९-ॐ करालिन्यै नमः, ५०-ॐ शंखिन्यै नमः, ५१-ॐ पद्मिन्यै नमः, ५२-ॐ क्षीरायै नमः, ५३-ॐ असन्धायै नमः, ५४-ॐ प्रहारिण्यै नमः, ५५-ॐ लक्ष्म्यै नमः, ५६-ॐ कामुक्यै नमः, ५७-ॐ लोलायै नमः, ५८-ॐ काकदृष्ट्यै नमः, ५९-ॐ अधोमुख्यै नमः, ६०-ॐ धूर्जट्यै नमः, ६१-ॐ मालिन्यै नमः, ६२-ॐ घोरायै नमः, ६३-ॐ कपाल्यै नमः, ६४-ॐ विषभोजिन्यै नमः ।।

आवाहयाम्यहं देवीर्योगिनीः परमेश्वरीः ।

योगाभ्यासेन संतुष्टाः परं ध्यानसमन्विताः ॥

दिव्यकुण्डलसंकाशा दिव्यज्वालास्त्रिलोचनाः ।

मूर्तिमतीरहयर्मूर्त्ताश्च उपाश्चैवोग्ररूपिणीः ।।

अनेकभावसंयुक्ताः संसारार्णवतारिणीः ।

यज्ञे कुर्वन्तु निर्विघ्नं श्रेयो यच्छन्तु मातरः ।।

ॐ चतुःषष्टियोगिनीभ्यो नमः, युष्मान् अहम् आवाहयामि, स्थापयामि, पूजयामि च।

## पूजनम्-

आवाहनके बाद प्रतिष्ठापूर्वक," "ॐ मनो जूतिर्जुषतामाज्यस्य वहस्पतिर्यजमिमं तनोत्वरिष्ट यज्ञ ग्वंग् समिम दधात् । विश्व देवास इह मादयन्तामो३ प्रतिष्ठ ।।"

निम्नलिखित नाम-मन्त्रसे गन्धादि उपचारोंद्वारा पूजन करे

ॐ चतुःषष्टियोगिनीभ्यो नमः" .......

## प्रार्थना-

"यज्ञे कुर्वन्तु निर्विघ्नं श्रेयो यच्छन्तु मातरः ।।"
इसके बाद हाथमें अक्षत लेकर 'अनया पूजया चतुःषष्टियोगिन्यः प्रीयन्ताम्, न मम ।' कहकर मण्डलपर अक्षत छोड़ दे।

## सप्तघृतमातृकापूजनम् -

आग्नेयकोणमें किसी काष्ठपीठ (पाटा) पर प्रादेशमात्र स्थानमें पहले रोली से स्वास्तिक बनाकर 'श्रीः' लिखे। इसके नीचे एक बिन्दु और इसके नीचे दो बिन्दु दक्षिण से उत्तरकी ओर दे। इसी प्रकार सात बिन्दु क्रमसे चित्रानुसार बनाइये।इसके बाद नीचेवाले सात बिन्दुओंपर घी या दूधसे प्रादेशमात्र सात धाराएँ निम्नलिखित मन्त्रसे दे।

## घृत-धाराकरणम् -

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्त्रधारम् । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ।।

इसके बाद गुड़के द्वारा बिन्दुओंकी रेखाओंको उपर्युक्त मन्त्र पढ़ते हुए मिलाये। तदनन्तर निम्नलिखित वाक्योंका उच्चारण करते हुए प्रत्येक मातृका का आवाहन और स्थापन करे

## आवाहन-स्थापनम्-

ॐ भूर्भुवः स्वः श्रियै नमः, श्रियमावाहयामि, स्थापयामि।

ॐ भूर्भुवः स्वः लक्ष्म्यै नमः, लक्ष्मीमावाहयामि, स्थापयामि।

ॐ भूर्भुवः स्वः धृत्यै नमः, धृतिमावाहयामि, स्थापयामि।

ॐ भूर्भुवः स्वः मेधायै नमः, मेधामावाहयामि, स्थापयामि।

ॐ भूर्भुवः स्वः पुष्टयै नमः, पुष्टिमावाहयामि, स्थापयामि ।२४

ॐ भूर्भुवः स्वः श्रद्धायै नमः, श्रद्धामावाहयामि, स्थापयामि ।

ॐ भूर्भुवः स्वः सरस्वत्यै नमः, सरस्वतीमावाहयामि, स्थापयामि।

प्रतिष्ठाः-

इस प्रकार आवाहन-स्थापनके बाद " ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ग्वंग् समिमं दधातु । विश्वे देवास इह मादयन्तामो ३ म्प्रतिष्ठ ।।"

इस मन्त्रसे प्रतिष्ठा करे, तत्पश्चात् 'ॐ भूर्भुवः स्वः सप्तघृतमातृकाभ्यो नमः' इस नाम-मन्त्रसे यथालब्धोपचार-पूजन करे।

प्रार्थना- तदनन्तर हाथ जोड़कर निम्नलिखित मन्त्र पढ़कर प्रार्थना करे।

"ॐ यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः । कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् ।।"

'अनया पूजया वसोर्धारादेवताः प्रीयन्ताम् न मम।' ऐसा उच्चारण कर मण्डलपर अक्षत छोड़ दे।

आयुष्यमन्त्रम्- पूजक अञ्जलिमें पुष ग्रहण करे तथा ब्राहमण आयुष्य-मन्त्रका पाठ करें।

ॐ आयुष्यं वर्चस्य ग्वंग् रायस्पोषमौद्धिदम् । इद ग्वंग् हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम्॥

ॐ न तद्रक्षा ग्वंग् सि न पिशाचास्तरन्ति देवानामोजः प्रथमज ग्वंग् हयेतत्।। यो बिभर्ति दाक्षायण ग्वंग् हिरण्य ग्वंग् स देवेषु कृणुते दीर्घमायुः समनुष्येषु कृणुते दीर्घमायुः ।।

ॐ यदाबध्नन्दाक्षायणा हिरण्य ग्वंग् शतानीकाय सुमनस्यमानाः । तन्म आ बध्नामि शतशारदायायुष्पाञ्जरदष्टिर्यथासम्।।

यदायुष्यं चिरं देवाः सप्तकल्पान्तजीविषु । ददुस्तेनायुषा युक्ता जीवेम शरदः शतम् ।।

दीर्घा नागा नगा नद्योऽनन्ताः सप्तार्णवा दिशः । अनन्तेनायुषा तेन जीवेम शरदः शतम् ।।
सत्यानि पञ्चभूतानि विनाशरहितानि च । अविनाश्यायुषा तद्वज्जीवेम शरदः शतम् ।।

शतं जीवन्तु भवन्तः ।

पुष्पार्पणम्:-

आयुष्यमन्त्रके श्रवणके बाद अञ्जलिके पुष्पों को सप्तधूतमातृका-मण्डलपर अर्पण कर दे।

दक्षिणा-संकल्पम्-

आयुष्यमन्त्रके पाठ करनेवाले ब्राहाणोंको निम्न सकल्पपूर्वक दक्षिणा दे।

ॐ अद्य--------- कृतैतदायुष्यवाचनकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं चायुष्यवाचकेभ्यो ब्राह्मणेभ्यो यथाशक्ति मनसोद्दिष्टां दक्षिणां विभज्य दातुमहमुत्सृजे।

## नवग्रह-मण्डल-पूजनम् :-

ग्रहोंकी स्थापनाके लिये ईशानकोण में प्रकार नौ कोष्ठक बनाये। बीचवाले कोष्ठकमें सूर्य, अग्निकोणमें चन्द्र, दक्षिणमें मङ्गल, ईशानकोणमें बुध, उत्तरमें बृहस्पति, पूर्वमें शुक्र, पश्चिममें शनि, नैर्ऋत्यकोणमें राहु और वायव्यकोणमें केतुकी स्थापना करे।

अब बायें हाथमें अक्षत लेकर नीचे लिखे मन्त्र बोलते हुए उपरिलिखित क्रमसे दाहिने हाथसे अक्षत छोड़कर ग्रहोंका आवाहन एवं स्थापन करे।

**१-सूर्य:-** (मध्यमें गोलाकार, लाल) सूर्यका आवाहन (लाल अक्षत-पुष्प लेकर)

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्यं च ।

हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ।।

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् ।

तमोऽरि सर्वपापघ्नं सूर्यमावाहयाम्यहम् ॥

ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपगोत्र रक्तवर्ण भो सूर्य ! इहागच्छ, इह तिष्ठ ॐ सूर्याय नमः, श्रीसूर्यमावाहयामि, स्थापयामि ।

**२-चन्द्र:-** (अग्निकोणमें, अर्धचन्द्र, श्वेत) चन्द्रका आवाहन (श्वेत अक्षत-पुष्पसे)

ॐ इमं देवा असपत्न ग्वंग् सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय ।

इमममुष्य पुत्रममुष्य पुत्रमस्यै विश एष वोऽमी

राजा सोमोऽस्माकं ब्राह्मणाना असपत्न ग्वंग् राजा ।।

दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।

ज्योत्स्नापतिं निशानाथं सोममावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयगोत्र शुक्लवर्ण भो सोम ! इहागच्छ, इह तिष्ठ ॐ सोमाय नमः, सोममावाहयामि, स्थापयामि ।

**३-मंगल:-** (दक्षिणमें, त्रिकोण, लाल) मङ्गलका आवाहन (लाल फूल और अक्षत लेकर)

ॐ अग्नि: मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपा ग्वंग् रेता ग्वंग् सि जिन्वति ॥

धरणीगर्भसम्भूतं विद्युत्तेजस्समप्रभम्। कुमारं शक्तिहस्तं च भौममावाहयाम्यहम् ।।

ॐ भूभुवः स्वः अवन्तिदेशोद्भव भारद्वाजगोत्र रक्तवर्ण भो भौम! इहागच्छ, इह तिष्ठ ॐ भौमाय नमः, भौममावाहयामि, स्थापयामि।

**४-बुधः-** (ईशानकोणमें, हरा, धनुष) बुधका आवाहन (पीले, हरे अक्षत-पुष्प लेकर)

ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते स ग्वंग् सृजेथामयं च।

अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ।।

प्रियङ्गुकलिकाभासं रूपेणाप्रतिम बुधम् ।

सौम्यं सौम्यगुणोपेतं बुधमावाहयाम्यहम् ॥

ॐ भूर्भुवः स्वः मगधदेशोद्धव आत्रेयगोत्र पीतवर्ण भो बुध ! इहागच्छ, इह तिष्ठ ॐ बुधाय नमः, बुधमावाहयामि, स्थापयामि।

**५-बृहस्पतिः-** (उत्तरमें पीला, अष्टदल) बृहस्पतिका आवाहन (पीले अक्षत-पुष्पसे)

ॐ बृहस्पते अति यदर्यो अर्हाद् घुमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् । उपयामगृहीतोऽसि बृहस्पतये त्वैष ते योनिबृहस्पतये त्वा ।।

देवानां च मुनीनां च गुरुं काञ्चनसंनिभम्। वन्द्यभूतं त्रिलोकानां गुरुमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव आङ्गिरसगोत्र पीतवर्ण भो गुरो ! इहागच्छ, इह तिष्ठ ॐ बृहस्पतये नमः, बृहस्पतिमावाहयामि, स्थापयामि ।

**६-शुक्रः-** (पूर्वमें श्वेत, चतुष्कोण) शुक्रका आवाहन (श्वेत अक्षत-पुष्पसे)

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ।। ऋतेन सत्यमिन्द्रियं विपान ग्वंग् शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।।

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम्।

सर्वशास्त्रप्रवक्तारं शुक्रमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवगोत्र शुक्लवर्ण भो शुक्र ! इहागच्छ, इह तिष्ठ ॐ शुक्राय नमः, शुक्रमावाहयामि, स्थापयामि।

**७-शनिः-** (पश्चिममें, काला मनुष्य) शनिका आवाहन (काले अक्षत-पुष्पसे)

ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभि स्रवन्तु नः ।।

नीलाम्बुजसमाभासं रविपुत्रं यमाग्रजम् । छायामार्तण्डसम्भूतं शनिमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपगोत्र कृष्णवर्ण भो शनैश्चर! इहागच्छ, इह तिष्ठ ॐ शनैश्चराय नमः, शनैश्चरमावाहयामि, स्थापयामि ।

८-राहु:- (नैर्ऋत्यकोणमें, काला मकर) राहुका आवाहन (काले अक्षत-पुष्यसे)

ॐ कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता।

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम्।

सिंहिकागर्भसम्भूतं राहुमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः राठिनपुरोद्भव  पैठीनसगोत्र कृष्णवर्ण भो राहो ! इहागच्छ, इह तिष्ठ ॐ राहवे नमः, राहुमावाहयामि, स्थापयामि ।

९-केतु:- (वायव्यकोणमें, कृष्ण खड्ग) केतुका आवाहन (धूमिल अक्षत-पुष्य लेकर)

ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ।।

पलाशधूप्रसङ्काशं तारकाग्रहमस्तकम् ।

रौद्रं रौद्रात्मकं घोरं केतुमावाहयाम्यहम्॥

ॐ भूर्भुवः स्वः अन्तर्वेदिसमुद्भव जैमिनिगोत्र धूम्रवर्ण भो केतो ! इहागच्छ, इह तिष्ठ ॐ केतवे नमः, केतुमावाहयामि, स्थापयामि।

नवग्रह-मण्डलकी प्रतिष्ठा:- आवाहन और स्थापनके बाद हाथमें अक्षत लेकर प्रतिष्ठा करें।

“ॐ मनो जूतिर्जुषतामाज्यस्य वहस्पतिर्यजमिमं तनोत्वरिष्ट यज्ञ ग्वंग् समिम दधात् । विश्व देवास इह मादयन्तामो३ प्रतिष्ठ ।।“

इस मन्त्रसे नवग्रहमण्डलमें अक्षत छोड़े।

अस्मिन् नवग्रहमण्डले आवाहिताः सूर्यादिनवग्रहा देवाः सुप्रतिष्ठिता वरदा भवन्तु।

नवग्रह-पूजन:- नवग्रहोंका आवाहन कर इनकी षोदशोपचार पूजा करे । नाम-मन्त्र निम्नलिखित है-

“ॐ आवाहितसूर्यादिनवग्रहेभ्यो देवेभ्यो नमः” ।

इस नाम-मन्त्रसे पूजन करनेके बाद हाथ जोड़कर निम्नलिखित प्रार्थना करे।

प्रार्थना:-

ॐ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।

गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ।।

सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मङ्गलं मङ्गलः।

सद्बुद्धिं च बुधो गुरुश्च गुरुता शुक्रः सुखं शं शनिः ।।

राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नति।

नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ।।

इसके बाद निम्नलिखित वाक्यका उच्चारण करते हुए नवग्रहमण्डलपर अक्षत छोड़ दे और नमस्कार करे।

निवेदन और नमस्कार:- 'अनया पूजया सूर्यादिनवग्रहाः प्रीयन्तां न मम'।

## अधिदेवता और प्रत्यधिदेवता स्थापनम् :-

अधिदेवताओंको ग्रहोंके दाहिने भागमें और प्रत्यधिदेवताओंको बायें भागमें स्थापित करना चाहिये।

### अधिदेवता :-

(हाथमें अक्षत-पुष्प लेकर निम्न मन्त्रोंको पढ़ते हुए चित्रानुसार नियत स्थानोंपर अधिदेवताओं का आवाहन-स्थापनपूर्वक अक्षत-पुष्पोंको छोड़ता जाय)।

१०-ईश्वर:- (सूर्यके दायें भागमें) आवाहन-स्थापन।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।।.

एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वाङ्गधरेण सार्धम्।

लोकेश यक्षेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन् नमस्ते ।।

ॐ भूर्भुवः स्वः ईश्वराय नमः, ईश्वरमावाहयामि, स्थापयामि ।

११-उमा:- (चन्द्रमाके दायें भागमें) आवाहन-स्थापन।

ॐ श्रीश्च ते लक्ष्मीश्चपत्न्यावहोरात्रे पार्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।

इष्णन्निषाणामुं म इषाण सर्वलोक म इषाण।

हेमाद्रितनयां देवीं वरदां शङ्करप्रियाम् ।

लम्बोदरस्य जननीमुमामावाहयाम्यहम् ॥

ॐ भूर्भुवः स्वः उमायै नमः, उमामावाहयामि, स्थापयामि । ३०

१२-स्कन्द:- (मङ्गलके दायें भागमें) आवाहन-स्थापन।

ॐ यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।

श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्य महि जातं ते अर्वन् ।।

रुद्रतेजःसमुत्पन्न देवसेनाग्रगं विभुम् ।

षण्मुखं कृत्तिकासूनुं स्कन्दमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः स्कन्दाय नमः, स्कन्दमावाहयामि, स्थापयामि ।

१३-विष्णु:- (बुध के दाएँ भाग में) आवाहन स्थापन।

ॐ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि । वैष्णवमसि विष्णवे त्वा ।।

देवदेवं जगन्नाथ भक्तानुग्रहकारकम् ।

चतुर्भुजं रमानाथं विष्णुमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः विष्णवे नमः, विष्णुमावाहयामि, स्थापयामि ।

१४-ब्रह्मा:- (बृहस्पतिके दायें भागमें) आवाहन-स्थापन।

ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।।

कृष्णाजिनाम्बरधरं पद्मसंस्थं चतुर्मुखम्।

वेदाधारं निरालम्ब विधिमावाहयाम्यहम् ॥

ॐ भूर्भुवः स्वः ब्रह्मणे नमः, ब्रह्माणमावाहयामि, स्थापयामि।

१५-इन्द्र:- (शुक्रके दायें भागमें) आवाहन-स्थापन।

ॐ सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् । जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ।

देवराजं गजारूढं शुनासीरं शतक्रतुम् ।

वज्रहस्तं महाबाहुमिन्द्रमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः इन्द्राय नमः, इन्द्रमावाहयामि, स्थापयामि ।

१६-यम:- (शनिके दायें भागमें) आवाहन-स्थापन।

ॐ यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहा ।

स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥

धर्मराजं महावीर्यं दक्षिणादिक्पतिं प्रभुम्।

रक्तेक्षणं महाबाहुं यममावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः यमाय नमः, यममावाहयामि, स्थापयामि।

१७-काल:- (राहुके दायें भागमें) आवाहन-स्थापन ।

ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि ।

समापो अद्भिरग्मत समोषधीभिरोषधीः ।।

अनाकारमनन्ताख्यं वर्तमानं दिने दिने ।

कलाकाष्ठादिरूपेण कालमावाहयाम्यहम् ॥

ॐ भूर्भुवः स्वः कालाय नमः, कालमावाहयामि, स्थापयामि ।

१८-चत्रगुप्त:- (केतुके दायें भागमें) आवाहन-स्थापन।

ॐ चित्रावसो स्वस्ति ते पारमशीय।

धर्मराजसभासंस्थं कृताकृतविवेकिनम् ।।

आवाहये चित्रगुप्तं लेखनीपत्रहस्तकम् ।।

ॐ भूर्भुवः स्वः चित्रगुप्ताय नमः, चित्रगुप्तमावाहयामि, स्थापयामि ।

## प्रत्यधिदेवता:-

बायें हाथमें अक्षत लेकर दाहिने हाथसे नवग्रहोंके बायें भागमें मन्त्रको उच्चारण करते हुए चित्रानुसार नियत स्थानोंपर अक्षत छोड़ते हुए एक-एक प्रत्यधिदेवताका आवाहन-स्थापन करे।

१९-अग्नि:-(सूर्यके बायें भागमें) आवाहन-स्थापन।

ॐ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे । देवाँ २ आ सादयादिह ।।

रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितम्।

वरदाभयदं देवमग्निमावाहयाम्यहम् ॥

ॐ भूर्भुवः स्वः अग्नये नमः, अग्निमावाहयामि, स्थापयामि।

२०-अप (जल):- (चन्द्रमाके बायें भागमें) आवाहन-स्थापन।

ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ।।

आदिदेवसमुद्भूतजगच्छुद्धिकराः शुभाः ।३२

ओषध्याप्यायनकरा अप आवाहयाम्यहम्॥

ॐ भूर्भुवः स्वः अद्भ्यो नमः, अप आवाहयामि, स्थापयामि ।।

२१-पृथ्वी:-(मंगलके बायें भागमें) आवाहन-स्थापन।

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी ।

यच्छा नः शर्म सप्रथाः ।।

शुक्लवर्णां विशालाक्षीं  कूर्मपृष्ठोपरिस्थिताम्।

सर्वशस्याश्रयां देवीं धरामावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः पृथिव्यै नमः, पृथिवीमावाहयामि, स्थापयामि।

२२-विष्णु:- (बुधके बायें भाग) आवाहन-स्थापन।

ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य पा ग्वंग् सुरे स्वाहा ।।

शङ्खचक्रगदापद्महस्तं गरुडवाहनम् ।

किरीटकुण्डलधरं विष्णुमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः विष्णवे नमः, विष्णुमावाहयामि, स्थापयामि ।

२३-इन्द्र:- (बृहस्पतिके बायें भागमें) आवाहन-स्थापन।

ॐ इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।

देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ।।

ऐरावतगजारूढं सहस्राक्षं शचीपतिम् ।

वज्रहस्तं सुराधीशमिन्द्रमावाहयाम्यहम् ॥

ॐ भूर्भुवः स्वः इन्द्राय नमः, इन्द्रमावाहयामि, स्थापयामि ।

२४-इन्द्राणी:- (शुक्रके बायें भागमें) आवाहन-स्थापन।

ॐ अदित्यै रास्नाऽसीन्द्राण्या उष्णीषः । पूषाऽसि घर्माय दीष्व ।।

प्रसन्नवदनां देवी देवराजस्य वल्लभाम्।

नानालङ्कारसंयुक्तां शचीमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः इन्द्राण्यै नमः, इन्द्राणीमावाहयामि, स्थापयामि।।

२५-प्रजापति:-(शनिके बायें भागमें) आवाहन-स्थापन ।

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।

यत्कामास्ते जुहुमस्तन्नो अस्तु वय ग्वंग् स्याम पतयो रयीणाम् ।।

आवाहयाम्यहं देवदेवेशं च प्रजापतिम् ।

अनेकव्रतकर्तारं सर्वेषां च पितामहम् ॥

ॐ भूर्भुवः स्वः प्रजापतये नमः, प्रजापतिमावाहयामि, स्थापयामि ।

२६-सर्प:- (राहुके बायें भागमें) आवाहन-स्थापन।

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु ।

ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ।।

अनन्ताद्यान्  महाकायान् नानामणिविराजितान् ।

आवाहयाम्यहं सर्पान् फणासप्तकमण्डितान् ।।

ॐ भूर्भुवः स्वः सर्पेभ्यो नमः, सर्पानावाहयामि, स्थापयामि।

२७-ब्रह्मा:- (केतुके बायें भागमें) आवाहन-स्थापन।

ॐ ब्रह्म जज्ञानं प्रथमं  पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।

स बुध्न्या  उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ।।

हंसपृष्ठसमारूढं देवतागणपूजितम् ।

आवाहयाम्यहं देवं ब्रह्माणं कमलासनम् ।।

ॐ भूर्भुवः स्वः ब्रह्मणे नमः, ब्राणमावाहयामि, स्थापयामि।

नवग्रहोंके समान ही अधिदेवता तथा प्रत्यधिदेवताओंका भी प्रतिष्ठापूर्वक पाद्यादि उपचारोंसे पूजन करना चाहिये।।

## पञ्चलोकपाल पूजनम्:-

नवग्रह-मण्डल में ही चित्रानुसार निर्दिष्ट स्थानोंपर गणेशादि पञ्चलोकपालो का बायें हाथमें अक्षत लेकर दाहिने हाथसे छोड़ते हुए आवाहन एवं स्थापन करे।

२८-गणेशजी:- (राहु के उत्तर)

ॐ गणानां त्वा गणपति ग्वंग्  हवामहे प्रियाणां त्वा प्रियपति  ग्वंग् हवामहे । निधीनां त्वा निधिपति ग्वंग्  हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥

लम्बोदरं महाकायं गजवक्त्रं चतुर्भुजम् ।

आवाहयाम्यहं देवं गणेशं सिद्धिदायकम् ॥

ॐ भूर्भुवः स्वः गणपते! इहागच्छ, इह तिष्ठ गणपतये नमः, गणपतिमावाहयामि, स्थापयामि ।

२९-देवी दुर्गा:- (शनि के उत्तर)

ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन ।

ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ।।

पत्तने  नगरे ग्रामे विपिने पर्वते गृहे।

नानाजातिकुलेशानीं  दुर्गामावाहयाम्यहम् ॥

ॐ भूर्भुवः स्वः दुर्गे ! इहागच्छ, इह तिष्ठ, दुर्गायै नमः,दुर्गामावाहयामि, स्थापयामि। .

३०-वायु:- (रवि के उत्तर)

ॐ आ नो नियुद्धिः शतिनीभिरध्वर सहस्रिणीभिरुप याहि यज्ञम् ।

वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ।।

आवाहयाम्यहं वायुं भूतानां देहधारिणम्।

सर्वाधारं महावेगं मृगवाहनमीश्वरम् ॥

ॐ भूर्भुवः स्वः वायो ! इहागच्छ, इह तिष्ठ वायवे नमः, वायुमावाहयामि, स्थापयामि।

३१-आकाश:- (राहु के उत्तर)

ॐघृत घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ।

दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ।

अनाकारं शब्दगुणं द्यावाभूम्यन्तरस्थितम्।

आवाहयाम्यहं देवमाकाशं सर्वगं शुभम् ॥

ॐ भूर्भुवः स्वः आकाश ! इहागच्छ, इह तिष्ठ आकाशाय नमः, आकाशमावाहयामि, स्थापयामि।

३२-अश्विनीकुमार:- (केतु के उत्तर)

ॐ या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम्।

उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा ॥।।३०।।

देवतानां च भैषज्ये सुकुमारौ भिषग्वरौ ।

आवाहयाम्यहं देवावश्विनौ पुष्टिवर्द्धनौ ।।

ॐ भूर्भुवः स्वः अश्विनौ ! इहागच्छ, इह तिष्ठ, अश्विभ्यां नमः, अश्विनावावाहयामि, स्थापयामि।

प्रतिष्ठा-

तदनन्तर - '"ॐ मनो जूतिर्जुषतामाज्यस्य वहस्पतिर्यजमिमं तनोत्वरिष्ट यज्ञ ग्वंग् समिम दधात् । विश्व देवास इह मादयन्तामो३ प्रतिष्ठ ।।"

इस मन्त्रसे अक्षत छोड़ते हुए पञ्चलोकपालोंकी प्रतिष्ठा करे। इसके बाद 'ॐ पञ्चलोकपालेभ्यो नमः' इस नाम-मन्त्रसे गन्धादि उपचारों द्वारा पूजनकर 'अनया पूजया पञ्चलोक पालाः प्रीयन्ताम्, न मम' ऐसा कहकर अक्षत छोड़ दे।

यज्ञादि विशेष अनुष्ठानोंमें पृथक्-पृथक् चक्र बनाकर उनकी विशेष पूजा की जाती है। नवग्रहमण्डलके देवगणों में वास्तोष्पति एवं क्षेत्रपाल देवता की पूजा करनेका विधान है, अतः उसे भी यहाँ दिया जा रहा है।

३३-वास्तोष्पति:-(नैऋत्ये )

ॐ वास्तोष्पते प्रतिजानीहयस्मान्त्स्वावेशो अनमीवो भवा नः ।

यत् त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ।।

वास्तोष्पतिं विदिक्कायं भूशय्याभिरतं प्रभुम्।

आवाहयाम्यहं देवं सर्वकर्मफलप्रदम्॥

ॐ भूर्भुवः स्वः वास्तोष्यते ! इहागच्छ, इह तिष्ठ वास्तोष्यतये नमः, वास्तोष्पतिमावाहयामि, स्थापयामि।

३४-क्षेत्रपालक :-(वायव्य)

ॐ नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर एतारमग्नेः ।

एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ।।

भूतप्रेतपिशाचाद्यैरावृतं शूलपाणिनम् ।

आवाहये क्षेत्रपालं कर्मण्यस्मिन् सुखाय नः ।।

ॐ भूर्भुवः स्वः क्षेत्राधिपते ! इहागच्छ, इह तिष्ठ, क्षेत्राधिपतये नमः, क्षेत्राधिपतिमावाहयामि, स्थापयामि।

तदनन्तर "ॐ मनो जूतिर्जुषतामाज्यस्य वहस्पतिर्यजमिमं तनोत्वरिष्ट यज्ञ ग्वंग् समिम दधात् । विश्व देवास इह मादयन्तामो३ प्रतिष्ठ ।।" इस मन्त्रसे प्रतिष्ठाकर

'ॐ वास्तोष्यतये नमः, 'ॐ क्षेत्रपालाय नमः' इस नाम-मन्त्रद्वारा गन्धादि उपचारोंसे पूजा करे।

दश दिक्पाल-पूजन नवग्रह-मण्डलमें परिधिके बाहर पूर्वादि दसों दिशाओंके अधिपति देवताओं (दिक्पाल देवताओं) का अक्षत छोड़ते हुए आवाहन एवं स्थापन करे।

३५-इन्द्र:-(पूर्वमें)

ॐ त्रातारमिन्द्रमवितारमिन्द्र ग्वंग् हवे हवे सुहव ग्वंग् शूरमिन्द्रम् ।

ह्वयामि शक्रं पुरुहूतमिन्द्र ग्वंग् स्वस्ति नो मघवा धात्विन्द्रः ।।३१।।

इन्द्रं सुरपतिश्रेष्ठं वज्रहस्तं महाबलम् ।आवाहये यज्ञसिद्ध्यै शतयज्ञाधिपं प्रभुम् ।।

ॐ भूर्भुवः स्वः इन्द्र ! इहागच्छ, इह तिष्ठ, इन्द्राय नमः, इन्द्रमावाहयामि, स्थापयामि।

३६- अग्नि:- (अग्निकोणमें)

ॐ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे ।

देवाँ २ आ सादयादिह ।।

त्रिपादं सप्तहस्तं च द्विमूर्धानं द्विनासिकम् ।

षण्नेत्रं च चतुःश्रोत्रमग्निमावाहयाम्यहम् ॥

ॐ भूर्भुवः स्वः अग्ने ! इहागच्छ, इह तिष्ठ, अग्नये नमः,

अग्निमावाहयामि, स्थापयामि।

३७ यमः-(दक्षिणमें)

ॐ यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहा ।

स्वाहा घर्माय स्वाहा धर्मः पित्रे ।

महामहिषमारूढं दण्डहस्तं महाबलम्।

यज्ञसंरक्षणार्थाय यममावाहयाम्यहम्॥

ॐ भूर्भुवः स्वः यम । इहागच्छ, इह तिष्ठ यमाय नमः, यममावाहयामि, स्थापयामि।

३८-निर्ऋतिः-(नैर्ऋत्यकोणमें)

ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।

अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ।।

सर्वप्रेताधिपं देवं निर्ऋतिं नीलविग्रहम् ।

आवाहये यज्ञसिद्ध्यै नरारूढं वरप्रदम् ॥

ॐ भूर्भुवः स्वः निर्ऋते ! इहागच्छ, इह तिष्ठ निर्ऋतये नमः, निर्ऋतिं आवाहयामि, स्थापयामि।

३९-वरुणः-(पश्चिममें)

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।

अहेडमानो वरुणेह बोध्युरुश ग्वंग् स मा न आयुः प्रमोषीः ।।

शुद्धस्फटिकसंकाशं जलेशं यादसां पतिम्।

आवाहये प्रतीचीशं वरुणं सर्वकामदम् ।।

ॐ भूर्भुवः स्वः वरुण । इहागच्छ, इह तिष्ठ, वरुणाय नमः, वरुणमावाहयामि, स्थापयामि।

४०-वायुः-(वायव्यकोणमें)

ॐ आ नो नियुद्धिः शतिनीभिरध्वर ग्वंग् सहस्रिणीभिरुप याहि यज्ञम् । वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ।।३२।।

मनोजवं महातेजं सर्वतश्चारिणं शुभम् ।

यज्ञसंरक्षणार्थाय वायुमावाहयाम्यहम् ॥

ॐ भूर्भुवः स्वः वायो ! इहागच्छ, इह तिष्ठ वायवे नमः, वायुमावाहयामि, स्थापयामि।

## ४१-कुबेर:-(उत्तरमें)

ॐ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।

इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति ।।

उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्ण ।

एष ते योनिस्तेजसे त्वा वीर्याय त्वा बलाय त्वा ।।

आवाहयामि देवेशं धनदं यक्षपूजितम्।

महाबलं दिव्यदेहं नरयानगतिं विभुम् ॥

ॐ भूर्भुवः स्वः कुबेर ! इहागच्छ, इह तिष्ठ कुबेराय नमः,कुबेरामवहयमि, स्थापयमि।

## ४२- ईशान:-(ईशानकोणमें)

ॐ तमीशानं जगतस्तस्थुषस्पतिं धियझिन्वमवसे हूमहे वयम् ।

पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥

सर्वाधिपं महादेवं भूतानां पतिमव्ययम्।

आवाहये तमीशानं लोकानामभयप्रदम् ।।

ॐ भूर्भुवः स्वः ईशान ! इहागच्छ, इह तिष्ठ ईशानाय नमः, ईशानमावाहयामि, स्थापयामि।

## ४३- ब्रह्मा:-(ईशान-पूर्वके मध्यमें)

ॐ ब्रह्म जज्ञानं प्रथम पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।

स बुध्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ।।

पायोनि चतुर्मूर्ति वेदगर्भ पितामहम्।

आवाहयामि ब्रह्माणं यज्ञसंसिद्धिहेतवे ।।

ॐ भूर्भुवः स्वः ब्रह्मन् ! इहागच्छ, इह तिष्ठ ब्रह्मणे नमः, ब्रह्माणमावाहयामि, स्थापयामि।।

## ४४- अनन्त:-(नैऋत्य-पश्चिमके मध्यमें)

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ।

अनन्तं सर्वनागानामधिपं विश्वरूपिणम् ।

जगतां शान्तिकर्तारं मण्डले स्थापयाम्यहम् ।।

ॐ भूर्भुवः स्वः अनन्त ! इहागच्छ, इह तिष्ठ अनन्ताय नमः, अनन्तमावाहयामि, स्थापयामि ।
प्रतिष्ठा:- इस प्रकार आवाहन कर इस मन्त्रसे"ॐ मनो जूतिर्जुषतामाज्यस्य वहस्पतिर्यजमिमं तनोत्वरिष्ट यज्ञ ग्वंग् समिम दधात् । विश्व देवास इह मादयन्तामो३ प्रतिष्ठ ।।

अक्षत छोड़ते हुए प्रतिष्ठा करे। तदनन्तर निम्नलिखित नाम-मन्त्रसे यथालब्धोपचार पूजन करे- 'ॐ इन्द्रादिदशदिक्पालेभ्यो नमः ।' इसके बाद 'अनया पूजया इन्द्रादिदशदिक्पालाः प्रीयन्ताम् न मम' येसा उच्चारण करके अक्षत मंडल पर छोड़ें।

सर्वतो भद्र मंडल पूजनम् :-

सफ़ेद वस्त्र पर कुल १९ खड़ी व १९ पड़ी रेखाओं के खीच कर ३२४ चौकोर खाने बनाएँ ।
बाह्य परिधि: - इनके भी बाहर तीन रेखाएँ चारो ओर खीचने पर तीन परिधियाँ बनती हैं।सबसे बाहर की परिधि में काले रंग से रँगा हुआ चावल भरते हैं।उसके अंदर की परिधि में लाल रंग से रँगा चावल भरते हैं।उसके अंदर की परिधि में सफ़ेद अक्षत भरते हैं।ये क्रमशः तमस्,रजस व सत् गुण के द्योतक हैं।
खंडेंदु :- मंडल के चरो कोनों पर तीन तीन चौकोर को मिला कर कुल १२ चौकोरों में सफ़ेद चावल से भरते हैं।
कृष्ण शृंखला :- प्रत्येक खंडेंदु से केंद्र की ओर ५ चौकोरों में काला चावल भरते हैं।
बाली :- प्रत्येक खंडेंदु से केंद्र की ओर शृंखला के दोनो ओर दो पंक्तियों में कुल ८८ चौकोरों में हरा चावल भरते हैं।
भद्र :– प्रत्येक खंडेंदु के दोनों ओर तीन पंक्तियों में कुल ७२ चौकोरों में लाल चावल भरते हैं।
वापी:- चरो दिशाओं में दो बल्लियों के मध्य कुल ९६ चकोरों में सफ़ेद चावल भरते हैं।

अंतर परिधि :- केंद्र के १६ चौकोरों के चारो ओर कुल २० चौकोरों में पीले रंग का चावल भरते हैं।

कर्णिका:- मध्य के १६ चौकोरों में लाल रंग के चावल से अष्ट दल कमल बनाते हैं।

आवाहन-स्थापन:-

मध्ये कर्णिकायां, ॐ ब्रह्मणे नमः ब्रह्माणम् आवाहयामि ॥१॥ उत्तरे वाप्यां ॐ सोमाय नमः सोममावा० ॥२॥ ईशान्यां खण्डेन्दौ ॐ ईशानाय नमः ईशान० ॥३॥ पूर्वे वाप्यां ॐ इन्द्राय नमः इन्द्रमा०॥४॥ आग्नेय्यां खण्डेन्दौ ॐ अग्नये नमः अग्निमा० ॥५॥ दक्षिणे वाप्यां ॐ यमाय नमः यममा० ॥६॥ नैऋत्यां खण्डेन्दौ ॐ निर्ऋतयेनम निऋतिमा० ॥७॥ पश्चिमे वाप्या ॐ वरुणाय नमः वरुणमा० ॥८॥ वायव्यां खण्डेन्दौ ॐ वायवे नमः वायुमा० ॥६॥ वायुसोममध्ये भद्रे ॐ अष्टवसुभ्यो नमः अष्टवसूनावा० ॥१०॥ सोमेशानयोर्मध्ये भद्रे ॐ एकादशरुद्रेभ्यो नमः एकादशरुद्रानावा० ॥११॥ ईशानेन्द्रमध्येभद्रे द्वादशादित्येभ्यो नमः द्वादशादित्यानावाहयामि ॥१२॥ इन्द्राग्निमध्ये भद्रे अश्विभ्यां नमः अश्विनौ आवाहयामि ॥१३॥ अग्नियममध्ये भद्रे स-

पैतृक विश्वेभ्यो देवेभ्यो नमः सपैतृकविश्वान् देवानावाहयामि ॥१४॥ यमनिऋतिमध्ये भद्रे ॐ सप्तयक्षेभ्यो नमः सप्तयक्षाना० ॥१५॥ निऋतिवरुणमध्येभद्रे अष्टकुलनागेभ्यो नमः अष्टकुलनागाना० ॥१६॥ वरुण वायुमध्ये भद्रे ॐ गन्धर्वाप्सरोभ्यो नमः गन्धर्वाप्सरसः आवाहयामि ॥१७॥ ब्रह्मसोममध्ये वाप्यां ॐ स्कन्दाय३९ नमः स्कन्दमा० ॥१८॥ तदुत्तरे ॐ वृषभाय नमः वृषभ० ॥१६॥तदुत्तरे ॐ शूलाय नमः शूल० ॥२०॥ तदुत्तरे महाकालाय नमः महाकाल० ॥२१॥ब्रह्मेशानमध्ये शृङ्खलायां ॐ दक्षादिसप्तगणेभ्यो नमः दक्षादिसप्तगणाना० ॥२२॥ ब्रह्मेन्द्रमध्ये वाप्यां ॐ दुर्गायै नमः दुर्गामा० ॥२३॥ तत्पूर्वे ॐ विष्णवे नमः विष्णुमा० ॥२४॥ ब्रह्माग्निमध्ये शृङ्खलायां ॐ स्वधायै नमः स्वधा० ॥२५॥ ब्रह्मयममध्ये वाप्यां ॐ मृत्युरोगेभ्यो नमः मृत्युरोगा० ॥२६॥ ब्रह्मनिर्ऋतिमध्ये श्रृङ्खलायां ॐ गणपतये नमः गणपतिमा० ॥२७॥ ब्रह्मवरुणमध्ये वाप्यां ॐ अद्भयो नमः अपः आ० ॥२८॥ ब्रह्मवायुमध्ये श्रृङ्खलायां ॐ मरुद्भयो नमः मरुतः आ० ॥२९॥ ब्रह्मणः पादमूले ॐ पृथिव्यै नमः पृथिवीमा० ॥३४॥ तद्वत्तरे ॐ गङ्गादिनदीभ्यो नमः गङ्गादिनदीः आ० ॥३१॥ तदुत्तरे ॐ सप्तसागरेभ्यो नमः सप्तसागराना०॥३२॥ तदुत्तरे ॐ मेरवे नमः मेरुमा० ॥३३॥ बाह्यपरिधौ सोमादिक्रमेण ॐ गदायै नमः गदां० ॥३४॥ ईशान्यां ॐ त्रिशूलाय नमः त्रिशूल० ॥३५॥ पूर्वे ॐ वज्राय नमः वज्रं ० ॥३६॥ आग्नेय्यां ॐ शक्तये नमः शक्तिमा० ॥३७॥ दक्षिणे ॐ दण्डाय नमः दण्डं० ॥३८॥ नैर्ऋत्यां ॐ खडगाय नमः खड्गं ॥३६॥ पश्चिमे ॐ पाशाय नमः पाशं० ॥४०॥ वायव्यां ॐ अंकुशाय नमः, अंकुशं० ॥४१॥ पुनः तद्वाह्यपरिधौ सोमादिक्रमेण ॐ गौतमाय नमः गौतमं० ॥४२॥ ईशान्यां ॐ भरद्वाजाय नमः भरद्वाजं० ॥४३॥ पूर्वे ॐ विश्वामित्राय नमः विश्वामित्रमा० ॥४४॥ आग्नेय्यां ॐ कश्यपाय नमः कश्यपमा०॥४५॥ दक्षिणे जमदग्नये नमः जमदग्निमावा० ॥४६॥ नैर्ऋत्यां ॐ वशिष्ठाय नमः वशिष्ठं० ॥४७॥ पश्चिमे ॐ अत्रये नमः अत्रिमा० ॥४८॥ वायव्यां ॐ अरुन्धत्यै नमः अरुन्धतीमा० ॥४६॥ तद्वाह्यपरिधी, पूर्वादिक्रमेण ऐन्द्रयै नमः ऐन्द्रीमा० ॥५०॥ आग्नेय्यां ॐ कौमार्यै नमः कौमारीमा० ॥५१॥ दक्षिणे ॐ ब्राह्मयै नमः ब्राह्मीमा० ॥५२॥नैर्ऋत्यां ॐ वारायै नमः वाराहीमा० ॥५३॥ पश्चिमे ॐ चामुण्डायै नमः चामुण्डामा० ॥५४॥ वायव्यां ॐ वैष्णव्यै नमः वैष्णवीमा० ॥५५॥ उत्तरे ॐ माहेश्वर्यै नमः माहेश्वरीमा० ॥५६॥ ईशान्यां ॐ वैनायक्यै नमः वैनायकीमा० ॥५७ .॥

इति सर्वतोभद्रदेवताः ॥

## अथ लिंगतोभद्रदेवता पूजनम्:-

तद्वाह्ये पूर्वे ॐ असिताङ्गभैरवाय नमः असिताङ्गभैरवमा० ॥१॥ आग्नेयां ॐ रुरुभैरवाय नमः रुरुभैरवमा० ॥२॥ दक्षिणे ॐ चण्डभैरवाय नमः चण्डभैरवमा० ॥३॥ नैर्ऋत्यां ॐ क्रोधभैरवाय नमः क्रोधभैरवमा० ॥४॥ पश्चिमे ॐ उन्मत्तभैरवाय नमः उन्मत्तभैरवमा० ॥५॥ वायव्यां ॐ कपालभैरवाय नमः कपालभैरवमा०॥६॥ उत्तरे ॐ भीषणभैरवाय नमः भीषणभैरवमा० ॥७॥ ईशान्यां ॐ संहारभैरवाय नमः संहारभैरवमा० ॥८॥

पुनः पूर्वादि ॥ ॐ भवाय नमः भवं० ॥१॥ आग्नेय्यां ॐ शर्वाय नमः शर्वं॥२॥ दक्षिणे ॐ पशुपतये नमः पशुपतिमा०॥३॥ नैर्ऋत्यां ॐ ईशानाय नमः ईशानं०॥४॥ पश्चिमे ॐ रुद्राय नमः रुद्रमा० ॥५॥ वायव्यां ॐ उग्राय नमः उग्रमा० ॥६॥ उत्तरे ॐ भीमाय नमः भीममा० ॥७॥ ईशान्यां ॐ महते नमः महान्तं॥८॥

तद्वाह्ये पूर्वे ॐ अनन्ताय नमः अनन्तं० ॥१॥ आग्नेय्यां ॐ ४० वासुकये नमः वासुकिमा० ॥२॥ दक्षिणे ॐ तक्षकाय नमः तक्षकमा० ॥३॥ नैर्ऋत्यां ॐ कुलिशायुधाय नमःकुलिशायुधमा० ॥४॥ पश्चिमे ॐ कर्कोटकाय नमः कर्कोटकमा० ॥५॥ वायव्यां ॐ शङ्खपालाय नमःशङ्खपालं० ॥६॥ उत्तरे ॐ कम्बलाय नमः कम्बलं० ॥७॥ ईशान्यां ॐ अश्वत्तराय नमः अश्वत्तरं० ॥८॥

ईशानेन्द्रमध्ये ॐ शूलाय नमः शूलं० ॥१॥ इन्द्राग्निमध्ये ॐ चन्द्रमौलिने नमः चन्द्रमौलिनं० ॥२॥ अग्नियममध्ये ॐ चन्द्रमसे नमः चन्द्रमसं० ॥३॥ यमनिऋतिमध्ये ॐ वृषभध्वजाय नमःवृषभध्वजमा० ॥४॥ नितिवरुणमध्ये ॐ त्रिलोचनाय नमः त्रिलोचनमा०॥५॥ वरुणवायुमध्ये ॐ शक्तिधराय नमः शक्ति* धरं० ॥६॥ वायुसोममध्ये ॐ महेश्वराय नमः महेश्वरमा० ॥७॥ सोमेशानमध्येॐशूलपाणयेनमःशूलपाणिनमा०॥ ८।।

इतिलिङ्गतोभद्रदेवता:।।

## अथ प्रधान देवता स्थापनं पूजनम् :-

सर्वतो भद्र मंडल के मध्य ताम्रकलश को स्थापित करके, उसके ऊपर प्रधान देवता को घी लेप कर अग्नयुत्तारण मंत्र से उसके ऊपर जल धारा गिराएँ, फिर स्थापित करें।

अग्नयुत्तारणमन्त्रा::-

ॐ समुद्रस्य त्वावकयाग्ने परिव्ययामसि। पावकोऽअस्मभ्य ग्वंग् शिवो भव ॥१॥

ॐ हिमस्य त्वा जरायुणाऽग्ने परिव्ययामसि । पावकोऽअस्मभ्य ग्वंग् शिवो भव ॥२॥

ॐ अपामिदं न्ययन ग्वंग् समुद्रस्य निवेशनम्। अन्न्याँस्ते ऽअस्मत्तपन्तु हेतय पावको ऽअस्मभ्य ग्वंग् शिवो भव ॥३॥

ॐ नमस्ते हरसे शोचिषे नमस्ते ऽअस्त्वर्चिषे। अन्न्याँस्ते ऽअस्मत्तपन्तु हेतय पावको ऽअस्मभ्य ग्वंग् शिवो भव ॥४॥

ॐ प्राणदा अपानदा व्यानदा वर्चोदा: वरिवोदाः। अन्याँस्ते ऽअसम्मत्तपन्तु हेतय पावको ऽअस्मभ्य ग्वंग् शिवो भव ॥५॥

**प्राणप्रतिष्ठा:-** प्रतिमा हस्तेन संस्पृश्य ॐ आँ ह्रीं क्रों यं रं लं वं शं षं सं हं सः अस्यां मूर्तौ (वा आसु मूर्तिषु प्रतिमाबहुत्वे) प्राणा इह प्राणाः ॥

पुनः- ॐ आँ ह्रीं  क्रों यं  रं लं वं शं षं सं हं सः अस्यां मूर्तौ  जीव इह स्थितः ॥

ॐ आँ ह्रीं  क्रों यं  रं लं वं शं षं सं हं सः अस्यां मूर्तौ  सर्वेन्द्रियाणि   वाङ् मनस्त्वक्-चक्षुः श्रोत्र-जिह्वा-घ्राण-पाणि-पादपायूपस्थानि   इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥

अस्यै प्राणाः प्रतिष्ठन्तु : अस्यै प्राणाः क्षरन्तु च । अस्यै देवत्वमर्चायै मामहेति च  कश्चन ॥

"ॐ मनो जूतिर्जुषतामाज्यस्य वहस्पतिर्यजमिमं तनोत्वरिष्ट यज्ञ ग्वंग् समिम दधात् । विश्व देवास इह मादयन्तामो३ प्रतिष्ठ ।।"

## षोडसोपचार पूजन :-

### पाद्यम्-

ॐ साई नाथाय नमः पाद्यं  समर्पयामि।।

### अर्घ्यम्-

ॐ साई नाथाय नमः ,अर्घ्यं समर्पयामि।।

### आचमनीयम्-

ॐ साई नाथाय नमः ,आचमनीयं समर्पयामि।।

### पञ्चामृतस्नानम् -

ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः । सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ।।

पञ्चामृतं मयानीतं पयो दधि घृतं मधु ।

शर्करया समायुक्तं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ साई नाथाय नमः, पञ्चामृतस्नानं समर्पयामि। (पञ्चामृतसे स्नान कराये।)

### शुद्धोदकस्नानम् -

गङ्गा च यमुना चैव गोदावरी सरस्वती ।

नर्मदा सिन्धुकावेरी स्नानार्थं प्रतिगृह्यताम् ।।

### अभिषेक:-

विष्णुसहस्रनामस्तोत्रम्-

श्रीपरमात्मने नमः

स्तुति-प्रार्थना-

।।ॐ भगवते वसुदेवाय नमः।। ॐ शिवाय नमः।।

ॐ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं

विश्वाधारं गगनसदृशं मेघवर्ण शुभाङ्गम्।

लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं,

वन्दे विष्णु भवभयहरं सर्वलोकैकनाथम् ॥

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे।

सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ।।

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।

विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥

नमःसमस्तभूतानामादिभूताय भूभृते।

अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥

## वैशम्पायन उवाच-

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः । युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ १ ॥

युधिष्ठिर उवाच-

किमेकं दैवतं लोके किं वाप्येकं परायणम्।

स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥ २ ॥

को धर्मः सर्वधर्माणां भवतः परमो मतः ।

किं जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥ ३ ।।

जय भीष्म उवाच -

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।

स्तुवन् नामसहस्त्रेण पुरुषः सततोस्थितः ॥ ४ ॥

तमेव चार्चयन् नित्यं भक्त्या पुरुषमव्ययम्।

ध्यायन् स्तुवन् न मस्यंश्च यजमानस्तमेव च ॥ ५ ॥

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।

लोकाध्यक्ष स्तुवन् नित्यं सर्वदुःखातिगो भवेत् ॥ ६ ॥

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं  महद्भूतं सर्वभूतभवोद्भवम् ॥ ७ ॥
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ ८ ॥
परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥ ९ ॥
पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ।। १०॥
यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ ११ ॥
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ १२ ॥
यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ।। १३ ।।
ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतक्रिद् भूतक्रिद् भावो भूतात्मा भूतभावनः ।। १४ ।।
पूतात्मा परमात्मा च मुक्तानां  परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ।। १५ ।।
योगो योगविदां  नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥१६॥
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
सम्भवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ १७।।
स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ।। १८॥
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ १९ ॥
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।

प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥ २०॥

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।

हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ २१ ॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।

अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान ॥ २२ ॥

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।

अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ २३ ॥

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः।

वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ २४ ॥

वसुर्वसुमनाः सत्यः समात्मा सम्मितः समः ।

अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ।। २५॥

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।

अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥ २६ ॥

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।

वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ।। २७ ॥

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।

चतुरात्मा - चतुर्व्यूहश्चतुर्दष्ट्रश्चतुर्भुजः ।। २८॥

भ्राजिष्णुर्भोजन  भोक्ता सहिष्णुर्जगदादिजः ।

अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ २९ ॥

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।

अतीन्द्रः संग्रहः सगों धृतात्मा नियमो यमः ।। ३०॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।

अतीन्द्रियो महामायो महोत्साहो महाबलः ।। ३१॥

महाबुद्धिर्महावीर्यो नि महाशक्तिर्महाद्युतिः ।

अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधक् ।। ३२ ॥

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।

अनिरुद्धः सुरानन्दो गोविन्दो गोविदां  पतिः ॥ ३३ ॥

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।

हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ ३४ ॥

अमृत्युः सर्वदृक् सिंहः संधाता सन्धिमान स्थिरः।

अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ ३५ ॥

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।

निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ ३६॥

अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ।

सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ।। ३७॥

आवर्तनो निवृत्तात्मा संवृतः सम्प्रमर्दनः ।

अहः संवर्तको वह्निरनिलो धरणीधरः ।। ३८॥

सुप्रसादः प्रसन्नात्मा विश्वधृग् विश्वभुग् विभुः।

सत्कर्ता सत्कृतः साधुर्जन्हुर्नारायणो नरः ॥ ३९ ॥

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।

सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥ ४० ॥

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।

वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ।। ४१ ॥

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।

नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ।। ४२ ॥

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।

ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥ ४३ ॥

अमृतां शूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।

औषधं जगतः सेतुः सत्यधर्मपराक्रमः । ४४ ॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।

कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः ॥ ४५ ॥

युगादिकृद् युगावर्तो नैकमायो महाशनः ।।

अदृश्योऽव्यक्तरूपश्च सहस्रजिदनन्तजित् ॥ ४६॥

इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।

क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ।। ४७ ॥
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ।। ४८॥
स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥ ४९ ॥
अशोकस्तारणस्तारः शूरः शौरिजनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ।। ५० ॥
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः ।। ५१ ॥
अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ।। ५२ ।।
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ।। ५३ ॥
उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ।। ५४ ॥
व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ५५॥
रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमता श्रेष्ठो धर्मो धर्मविदुत्तमः ।। ५६ ॥
वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ।। ५७ ॥
ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ।। ५८ ॥
विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम्।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ५९॥
अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ।। ६० ।।

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सता गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ६१ ॥
सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ।। ६२ ।।
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ६३ ॥
धर्मगुब् धर्मकृद् धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ।। ६४ ॥
गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृगुरुः ।। ६५ ॥
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद् भोक्ता कपीन्द्रो भूरिदक्षिणः ।। ६६॥
सोमपोऽमृतपः सोमः पुरुजित् पुरुसत्तमः ।
विनयो जयः सत्यसंधो दाशार्हः सात्वतां पतिः ।। ६७ ॥
जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ।। ६८॥
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥ ६९॥
महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाश्रिङ्गः कृतान्तकृत् ॥ ७० ॥
महावराहो गोविन्दः सुषेण: कनकाङ्गदी।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ७१ ॥
वेधाः स्वाङ्गोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥७२॥
भगवान् भगहानन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ७३ ॥
सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।

दिविस्पृक् सर्वदग् व्यासो वाचस्पतिरयोनिजः ।। ७४ ॥

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।

संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ।। ७५॥

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।

गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ७६ ॥

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।

श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ।। ७७॥

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।

श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ।। ७८॥

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।

विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ ७९ ॥

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।

भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ।। ८०॥

अर्चिष्पानर्चित: कुम्भो विशुद्धात्मा विशोधनः ।

अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ८१॥

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।

त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ८२ ॥

कामदेवः कामपालः कामी कान्तः कृतागमः ।

अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनंजयः ।। ८३ ।।

ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।

ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ।। ८४ ।।

महाक्रमो महाकर्मा महातेजा महोरगः ।

महाक्रतुर्महायज्वा महायज्ञो महाहविः ।। ८५ ॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।

पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ८६ ॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः।

वसुप्रदो वासुदेवो वसुर्वसुमना हविः ।। ८७ ॥

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ।। ८८॥
भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥ ८९ ॥
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ।। ९०॥
एको नैकः सवः कः किं यत् तत् पदमनुत्तमम् ।
लोकबन्धुलोकनाथो माधवो भक्तवत्सलः ॥ ९१॥
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥ ९२ ॥
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥ ९३ ।।
तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥ ९४ ।।
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ९५ ॥
समावतोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥ ९६ ।।
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा  महाकर्मा कृतकर्मा कृतागमः ।। ९७ ॥
उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी॥ ९८॥
सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो  महाभूतो महानिधिः ॥ ९९ ।।
कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ।। १००॥
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।

न्यग्रोधोदुम्बरोऽश्वस्थश्चाणूरान्ध्रनिषूदनः ॥ १०१ ।।

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।

अमूर्तिरनघोऽचिन्त्यो भयकृद् भयनाशनः ॥ १०२॥

अणुबृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान्।

अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥ १०३ ।।

भारभृत् कथितो योगी योगीशः सर्वकामदः।

आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ १०४ ॥

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।

अपराजितः सर्वसहो नियन्ता नियमो यमः ॥ १०५ ।।

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः ।

अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ॥ १०६॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग् विभुः।

रविर्विरोचनः सूर्यः सविता रविलोचनः ॥ १०७ ॥

अनन्तो हुतभुग भोक्ता सुखदो नैकजोऽग्रजः ।

अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ १०८॥

सनात् सनातनतमः कपिलः कपिरप्ययः ।

स्वस्तिदः स्वस्तिकृत  स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः ॥ १०९॥

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।

शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ।। ११०॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।

विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ।। १११॥

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।

वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥ ११२ ॥

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।

चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥ ११३ ।।

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।

जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥ ११४ ।।

आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।

ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥ ११५ ॥

प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः ।

तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥ ११६ ॥

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।

यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥ ११७ ॥

यज्ञभृद् यज्ञक्रिद् यज्ञी यज्ञभुग् यज्ञसाधनः ।

यज्ञान्तकृद् यज्ञगुह्यमन्नमन्नाद एव च ॥ ११८॥

आत्मयोनिः स्वयंजातो वैखानः सामगायनः ।

देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥ ११९ ॥

शङ्खभ्निन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।

रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ १२० ॥

सर्वप्रहरणायुध: ॐ नम: इति ।।

-

।।ॐ द्यौः शान्तिरन्तरिक्ष ग्वंग् शान्तिः, पृथिवी शान्तिरापः, शान्तिरोषधयः शान्तिः ।वनस्पतयः शान्तिर्विश्वेदेवाः, शान्तिर्ब्रह्म शान्तिः, सर्व ग्वंग् शान्तिः, शान्तिरेव शान्तिः, सा मा शान्तिरेधि ।।

ॐ साई नाथाय नमः, शुद्धोदकस्नानं / अभिषेकमं समर्पयामि । (शुद्ध जलसे स्नान कराये।)

## आचमनम्-

शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।। (आचमनके लिये जल दे।)

## वस्त्रम् -

शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् ।

देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे॥

ॐ साई नाथाय नमः , वस्त्रं समर्पयामि । (वस्त्र समर्पित करे।)

## आचमनम्:- वस्त्रान्ते आचमनीयं जलं समर्पयामि । (आचमनके लिये जल दे।)

## उपवस्त्रम्:-

ॐ सुजातो ज्योतिषा सह शर्म वरूथमाऽसदत्स्वः । वासो अग्ने विश्वरूप ग्वंग् व्ययस्व विभावसो ।

ॐ साई नाथाय नमः, उपवस्त्र (उपवस्त्राभावे रक्तसूत्रम् समर्पयामि) । (उपवस्त्र समर्पित करे।)

## आचमनीयम्:-

उपवस्त्रान्ते आचमनीयं जलं समर्पयामि। (आचमनके लिये जल दे।)

## चन्दनम्:-

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।

विलेपनं सुरश्रेष्ठ ! चन्दनं प्रतिगृह्यताम् ।।

ॐ साई नाथाय नमः, चन्दनानुलेपन समर्पयामि । (चन्दन अर्पित करे।)

## अक्षतम्:-

अक्षताश्च सुरश्रेष्ठ कुङ्कमाक्ताः सुशोभिताः ।

मया निवेदिता भक्त्या गृहाण परमेश्वर ।।

ॐ साई नाथाय नमः, अक्षतान् समर्पयामि । (अक्षत चढ़ाये।)

## पुष्पमालानि :-

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो।

मयाहतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥

ॐ साई नाथाय नमः, पुष्पमाला समर्पयामि । (पुष्पमाला समर्पित करे।)

## श्री साईबाबा अष्टोत्तरशतनामावलिः-

१. ॐ श्री साईनाथाय नमः

२. ॐ लक्ष्मीनारायणाय नमः

३. ॐ कृष्णरामशिवमारुत्यादिरूपाय नमः

४. ॐ शेषशायिने नमः

५. ॐ गोदावरीतटशीलधीवासिने नमः

६. ॐ भक्तहृदालयाय नमः

७. ॐ सर्वहन्निलयाय नमः

८. ॐ भूतावासाय

९. ॐ भूतभविष्यद्भाववर्जिताय

१०. ॐ कालातीताय नमः

११. ॐ कालाय नमः

१२. ॐ कालकालाय नमः

१३. ॐ कालदर्पदमनाय नमः

१४. ॐ मृत्युंजयाय नमः

१५. ॐ अमर्त्याय नमः

१६. ॐ माभयप्रदाय नमः

१७. ॐ जीवाधाराय नमः

१८. ॐ सर्वाधाराय नमः

१९. ॐ भक्तावनसमर्थाय नमः

२०. ॐ भक्तावनप्रतिज्ञाय नम :

२१. ॐ अन्नवस्त्रदाय नमः

२२.ॐआरोग्यक्षेमदाय नमः

२३. ॐ धनमाङ्गल्यप्रदाय नमः

२४. ॐ ऋद्धिसिद्धीदाय नमः

२५. ॐ पुत्रमित्रकलत्रबन्धुदाय नमः

२६. ॐ योगक्षेमवहाय नमः

२७. ॐआपद्वान्धवाय नमः

२८. ॐ मार्गबन्धवे नमः

२९- ॐ भक्तिमुक्ति स्वर्गापदवर्गदाय नमः

३०. ॐ प्रियाय नमः

३१. ॐ प्रीतिवर्धनाय नमः

३२. ॐ अन्तर्यामिणे नमः

३३. ॐ सच्चिदात्मने नमः

३४. ॐ नित्यानन्दाय नमः

३५. ॐ परमसुखदाय नमः

३६. ॐ परमेश्वराय नमः

३७. ॐ परब्रह्मणे नमः

३८. ॐ परमात्मने नमः

३९. ॐ ज्ञानस्वरुपिणे नमः

४०. ॐ जगत पित्रे नमः

४१. ॐ भक्तानां मातृधातृपितामहाय नमः ।

४२. ॐ भक्ताभयप्रदाय नमः

४३. ॐ भक्तपराधीनाय नमः

४४. ॐ भक्तानुग्रहकातराय नमः

४५. ॐ शरणागतवत्सलाय नमः

४६. ॐ भक्तिशक्तिप्रदाय नमः

४७. ॐ ज्ञानवैराग्यदाय नमः

४८. ॐ प्रेमप्रदाय नमः

४९. ॐ संशयहृदयदौर्बल्यपापकर्म वासनाक्षयकराय नम

५०. ॐ हृदयग्रन्थिभेदकाय नमः

५१. ॐ कर्मध्वंसिने नमः

५२. ॐ शुद्धसत्त्वस्थिताय नमः

५३. ॐ गुणातीतगुणात्मने नमः

५४. ॐ अनंतकल्याणगुणाय नमः

५५. ॐ अमितपराक्रमाय नमः

५६- ॐ जयिने नमः

५७- ॐ दुर्धर्षाक्षोभ्या य नमः

५८. ॐ अपराजिताय नमः

५९. ॐ त्रिलोकेषु अविधातगतये नमः

६०. ॐ अशक्यरहिताय नमः

६१. ॐ सर्वशक्तिमूर्तये नमः

६२. ॐ सुरुपसुन्दराय नमः

६३. ॐ सुलोचनाय नमः ।

६४. ॐ बहुरुपविश्वमूर्तये नमः

६५. ॐ अरुपाव्यक्ताय नमः

६६. ॐ अचिन्त्याय नमः

६७. ॐ सूक्ष्माय नमः।

६८. ॐ सर्वान्तर्यामिणे नमः

६९. ॐ मनोवागतीताय नमः

७०. ॐ प्रेममूर्तये नमः ।

७१. ॐ सुलभदुर्लभाय नमः |

७२. ॐअसहायसहायाय नमः

७३. ॐ अनाधनाथदीनबन्धवे नमः

७४. ॐ सर्वभारभृते नमः

७५. ॐ अकनिककर्मसुकर्मिणे नमः

७६. ॐ पुण्यश्रवणकीर्तनाय नमः

७७. ॐ तीर्थाय नमः

७८. ॐ वासुदेवाय नमः

७९. ॐ सतां गतये नमः

८०. ॐ सत्परायणाय नमः

८१. ॐ लोकनाथाय नमः

८२.. ॐ पावनानधाय नमः

८३. ॐ अमृतांशवे नमः

८४. ॐ भास्करप्रभाय नमः

८५. ॐ ब्रह्मचर्यतपश्चर्यादिसुव्रताय नमः

८६. ॐ सत्यधर्मपरायणाय नमः

८७. ॐ सिद्धेश्वराय नमः

|८८. ॐ सिद्धसङ्कल्पाय नमः

८९. ॐ योगेश्वराय नमः

९०. ॐ भगवते नमः

९१. ॐ भक्तवत्सलाय नमः

९२. ॐ सत्पुरुषाय नमः

९३. ॐ पुरुषोत्तमाय नमः

९४. ॐसत्यतत्वबोधकाय नमः

९५, ॐ कामादिषवैरिध्वंसिने नमः

९६, ॐ अभेदानन्दानुभवप्रदाय नमः

९७. ॐ समसर्वमतसमताय नमः

९८. ॐ श्री दक्षिणामूर्तये नमः

९९. ॐ श्री वेङ्कटेशरमणाय नमः

१००.ॐ अद्भुतानन्दचयाय नमः

१०१. ॐ प्रपन्नार्तिहराय नमः

१०२. ॐ संसारसर्वदुःखक्षयकराय नमः

१०३. ॐ सर्वावित्सर्वतोमुखाय नमः

१०४. ॐ सर्वान्तर्बहिःस्थिताय नमः

१०५. ॐ सर्वमङ्गलकराय नमः

१०६, ॐ सर्वामिष्टप्रदाय नमः

१०७. ॐ समरसन्मार्गस्थापनाय नमः

१०८. ॐ श्री समर्थसद्गुरुसाईनाथाय नमः

नमो साई शिवनंदना । नमो साई कमलासना । नमों साई मधुसूदना । पंचवदना साई नमो। नमो साई अत्रिनंदना। नमो साई पाकशासना ।। नमो साई निशारमणा । वन्हिनारायणा साई नमो।

नमो साई रुक्मिणीवरा। नमो साई चिन्दास्करा । नमो साई ज्ञानसागरा । ज्ञानेशरा श्री साई नमो।।

## नानापरिमल द्रव्य:-

ॐ साई नाथाय नमः नानापरिमलद्रव्याणि समर्पयामि ।(विविध परिमल द्रव्य समर्पित करे।)

## सुगन्धित द्रव्य:-

ॐ साई नाथाय नमः, सुगन्धितद्रव्यं समर्पयामि । (सुगन्धित द्रव्य (इत्र आदि) चढ़ाये।)

## धूपम् :-

ॐ साई नाथाय नमः, धूपमाघ्रापयामि।

## दीपम् :-

ॐ साई नाथाय नमः, दीपं दर्शयामि ।

दीप दिखाकर हाथ धो ले।

## नैवेद्यम्:-

जलसे चतुष्कोण घेरा लगाकर भगवान के आगे नैवेद्य रखें।

ॐ अमृतोपस्तरणमसि स्वाहा। ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ उदानाय स्वाहा । ॐव्यानाय स्वाहा । ॐ समानाय स्वाहा। ॐ अमृतापिधानमसि स्वाहा।

ॐ भूर्भुवः स्वः श्री साई नाथाय नमः, नैवेद्यं निवेदयामि ।

नैवेद्यान्ते आचमनीयं जलं समर्पयामि ।

## करोद्वर्तन:-

ॐ साई नाथाय नमः , करो द्वर्तनं

समर्पयामि । (करोद्वर्तनके लिये गन्ध समर्पित करे।)

## ताम्बूलम्:-

ॐ साई नाथाय नमः, ताम्बूलं समर्पयामि।

(सुपारी, इलायची, लौंगसहित पान चढ़ाये।)

दक्षिणां:-

ॐ साई नाथाय नमः दक्षिणां समर्पयामि ।

(द्रव्य-दक्षिणा चढ़ाये।)

## आरती:-

ॐ साई नाथाय  नमः, आरार्तिकम् समर्पयामि ।

(आरती करे।) ॐ कदली----

## पुष्पाञ्जलि:-

ॐ साई नाथाय  नमः, मन्त्रपुष्पाञ्जलि

समर्पयामि । (पुष्पाञ्जलि समर्पित करे।)

## प्रदक्षिणा-

ॐ ॐ साई नाथाय नमः, प्रदक्षिणां समर्पयामि ।

(प्रदक्षिणा करे।)

**प्रार्थना:-** हाथमें पुष्प लेकर इस प्रकार प्रार्थना करे।

ॐ साई नथाय विद्महे सच्चिदा नंदाय धिमहि तन्नो सद्गुरू प्रचोदयत् ।

## नमस्कार:-

ॐ साई नाथाय  नमः, इस नाम-मन्त्रसे नमस्कारपूर्वक

पुष्प समर्पित करे।

तदनन्तर निम्नलिखित नाम-मन्त्रसे यथालब्धोपचार पूजन करे- "ॐ श्री साई नथाय  नम:"। इसके बाद 'अनया पूजया श्री साईनाथ प्रीयन्ताम् न मम' येसा उच्चारण करके अक्षत मंडल पर छोड़ें।

रक्षा- विधानम् : –

बायें हाथ में अक्षत,पीली सरसों,द्रव्य और तीन तार की मौली लेकर दाहिने हाथ से ढक कर नीचे लिखे मन्त्र से अभिमंत्रित करें।

ॐ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम् ।

विष्णु रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ।।

स्थानाधिपं नमस्कृत्य ग्रहनाथं निशाकरम् ।

धरणीगर्भसम्भूतं शशिपुत्रं बृहस्पतिम् ।।

दैत्याचार्य नमस्कृत्य सूर्यपुत्रं महाग्रहम् ।

राहु केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ।।
शक्राद्या देवताः सर्वाः मुनींश्चैव तपोधनान् ।
गर्ग मुनि नमस्कृत्य नारद मुनिसत्तमम्॥
वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम् ।
व्यासं मुनि नमस्कृत्य सर्वशास्त्रविशारदम् ॥
विद्याधिका ये मुनय आचार्याश्च तपोधनाः ।
तान् सर्वान् प्रणमाम्येवं यज्ञरक्षाकरान् सदा ।।

अब निम्नलिखित मन्त्रोंसे दसों दिशाओंमें अक्षत तथा पीली सरसों छोड़े:-

पूर्वे रक्षतु वाराह: आग्न्येय्यां  गरुडध्वजः ।
दक्षिणे पद्मनाभमस्तु नैर्ऋत्यां मधुसूदनः ।।
पश्चिमे पातु गोविन्दो वायव्यां तु जनार्दनः ।
उत्तरे श्रीपती रक्षेद् यैशान्यां  तु महेश्वरः ॥
ऊर्ध्व गोवर्धनो रक्षेद् ह्याधोऽनन्तस्तथैव च ।
एवं दश दिशो रक्षेद् वासुदेवो जनार्दनः ॥
रक्षाहीनं तु यत्स्थानं रक्षत्वीशो महाद्रिधृक् ।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ॥
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ।
अपक्रामन्तु ते  भूता ये भूता भूमिसंस्थिताः ।।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशः ।।
सर्वेषामविरोधेन पूजाकर्म समारभे ॥

इसके बाद हाथकी मौली (नारा) को गणेशजीके सम्मुख रख दे। फिर इसे उठाकर गणपति आदि आवाहित देवताओ पर चढ़ाये तथा उसमें से पहले पूजक आचार्यको और आचार्य पूजकको रक्षा बाँधे।।

यजमानद्वारा रक्षाबन्धन-

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाऽऽप्नोति दक्षिणाम्।

दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ।।

अब यजमान निम्नलिखित मन्त्रसे तिलक करके प्रणाम करें।

यजमानद्वारा आचार्य का तिलक-

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।

जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

आचार्यद्वारा रक्षाबन्धन-

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।

तेन त्वामनुबध्नामि रक्षे मा चल मा चल ।।

अब आचार्य यजमानको निम्न मन्त्रसे तिलक करे-

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

## आभ्युदयिक-नान्दीमुखश्राद्धम्:-

सांकल्पिक आभ्युदयिक नन्दीमुखश्राद्ध षोडशमातृका के समक्ष ही करने का विधान है । पूर्वाभिमुख सव्य रहकर ही देवपूजा की तरह इसमें पितरों की अर्चना होती है। पूर्व दिशा की ओर सत्यवसु नामक सपत्नीक विश्वेदेव के लिए दो आसन रखें । माता, पितामही प्रपितामही तथा पिता, पितामह और प्रपितामह के लिए ६ आसन रखें । सपत्नीक मातामह, प्रमातामह, ब्रिध्दप्रमातामह के लिए भी ३ आसन रखें ।इस प्रकार ११ आसन होते हैं , जिन पर दूर्वा अथवा कुशा के शिरो भाग पर गाँठ बाँधकर उत्तराग्र क्रम से रखें ।

## संकल्प :-

अद्देहेत्यादिदेशकालौ संकीर्त्य अमुकगोत्राणाम् मातृपितामही प्रपितामही नाम् अमुकदेवीनां गायत्रीसावित्रीसरस्वती स्वरूपाणां नान्दीमुखीनां तथा अमुकगोत्राणां पितृपितामहप्रपितामहानाम् अमुक देवानां वसुरुद्रादित्यस्वरूपाणां नान्दीमुखानां तथामुकगोत्राणाम् मातामह प्रमातामहवृद्ध प्रमातामहानाम् अमुकदेवानां सपत्नीकानां अग्निवरुणप्रजापति स्वरूपाणां नान्दीमुखानां प्रीतये अमुककर्मनिमित्तकं सत्यवसुसंज्ञकविश्वेदेवपूर्वकं संक्षिप्त संकल्पविधिना नान्दी मुखश्राद्धमहं करिष्ये।

न स्वधाशर्मवर्मेति पितृनाम न चोच्चरेत् ।

न कर्म पितृतीर्थेन न कुशा द्विगुणीकृताः ।।

न तिलैर्नापसव्येन पित्र्यमन्त्रविवर्जितम् ।

अस्मच्छब्दं  न कुर्वीत श्राद्धे नान्दीमुखे क्वचित् ।।

### आभ्युदयिकनान्दीश्राद्धप्रारूपः-

चौकोर खींच कर निम्नांकित क्रम से बैठाना है।

पूर्व - विश्वे देव- २

उत्तर - सपत्नीत-मातामह-प्रमातामह-वृद्ध प्रमातामह -३

पश्चिम - पित्रि- पितामह -प्रपितामह-३

दक्षिण - मात्रि -पितामही -प्रपितामही- ३

पादप्रक्षालनम् - (पादप्रक्षालन के लिए आसन पर जल छोड़ें ।

ॐ सत्यवसुसंज्ञाकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं व: पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ।

ॐ मातृ पितामही-प्रपितामह्य: नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ।

ॐ पितृ पितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ।

ॐ मातामह-प्रमातामह-वृद्धप्रमातामहा सपत्नीका: नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ।,

आसनदानम् -- (विश्वेदेव के लिए कुश का आसन तथा अन्य के लिए यथासाध्य आसन दें।)

ॐ सत्यवसुसंज्ञाकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने नमो नमः। ।।७७।।

ॐ मातृ-पितामही-प्रपितामयः नान्दीमुखा: ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः।

ॐ पितृ-पितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः।

ॐ मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीका: नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः।६०

गंधादिदानम्- (विश्वेदेव तथा मातृपितामहीप्रपितामही पितृपितामह प्रपितामह, सपत्नीक मातामह-प्रमातामह-वृन्दप्रमातामह के आसन पर जल, वस्त्र, यज्ञोपवीत चन्दन (रोली) अक्षत, पुष्प, धूप, दीपक, नैवेद्य, ऋतुफल, पानसुपारी आदि अर्पण कर पूजन करें।

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ।

ॐ मातृ-पितामही प्रपितामहा: नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहासम्पद्यतां वृद्धिः ।।

ॐ पितृ-पितामह-प्रपितामहा: नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ।

ॐ मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं स्वाहा सम्पद्यतां गन्धाद्यर्चनं वृद्धिः ।।

भोजननिष्क्रयदानम् **:--** (भोजन-निष्क्रय निमित दक्षिणा दें।)

ॐ सत्यवसुसंज्ञका: विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राहमणभोजन पर्याप्ताऽऽमान्न-निष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पचतां वृद्धिः ।

ॐ मात-पितामही प्रपितामत्यः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राहमणभोजन पर्याप्ताऽऽमान्न-निष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पचतां वृद्धिः ।

ॐ पितृ-पितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राहमणभोजन पर्याप्ताऽऽमान्न-निष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पचतां वृद्धिः ।

ॐ मातामह-प्रमातामह-वृद्धप्रमतामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्म-ब्राह्मण-भोजनपर्याप्ताऽऽमान-निष्कयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ।
सक्षीरयवमुदकदानम् **--** (दूध, जब एवं जल मिलाकर अर्पण करें ।)

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः प्रीयन्ताम् । मातृ-पितामही-प्रपितामयः नान्दीमुखा : प्रीयन्ताम् । पितृ-पितामह-प्रपितामहाः नान्दीमुखाः प्रीयन्ताम् । मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः प्रीयन्ताम् ।

जलाऽक्षतपुष्पप्रदानम् **--** (जल, पुष्प एवं चावल सभी आसनों पर छोड़ें ।)

शिवा आप: संतु,इति जलम्।सौमनस्यमस्तु, इति पुष्पम्।अक्षतं चाऽरिष्टं चाऽस्तु इत्यक्षतान् ।

जलधारादानम् -- (पितरों के लिए अंगूठे की ओर से पूर्ण जलधारा दें।

ॐ अधोराः पितरः सन्तु । इति पूर्वाग्रां जलधारां दद्यात् ।

आशीः प्रार्थना **--** (हाथ जोड़कर प्रार्थना करें ।)

यजमान:- कृताञ्जलिः प्रार्थयेत् --

ॐ गोत्रन्नो वर्धतां दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च । श्रद्धा च नो मा व्यगमद् बहुदेयं च नोऽस्तु । अन्नं च नो बहुभवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा च याचिष्म कञ्चन । एताः सत्या आशिषः सन्तु ।।

ब्राहमणा:-सन्त्वेता: सत्या आशिष इति ।

## दक्षिणादानम् :--

(मुनक्का, आँवला, यव तथा अदरख मूल आदि लेकर दक्षिणा सहित अलग-अलग संकल्प पूर्वक अर्पण करें ।)

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिव्यर्थ द्राक्षाऽऽमलकयवमूलनिष्क्रयिणी दक्षिणां दातुमहमुत्सूजे।

ॐ मात-पितामही प्रपितामयः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठा-सिद्ध्यर्थ द्राक्षामलक-यवमूलनिष्क्रयिणी दक्षिणां दातुमहमुत्सृजे ।

ॐ पितृ पितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थ द्राक्षामलकयवमूलनिष्क्रयिणी दक्षिणां दातुमहमुत्सृजे।

ॐ मातामह-प्रमाताह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासियर्थ द्राक्षामलकयवमूलनिष्क्रयिणी दक्षिणां दातुमहमुत्सृजे ।

मन्त्रः - (यजमानः वदेत्) (यजमान स्वयं कहें ।)

ॐ उपस्मै गायता नरः पवमानायेन्दवे । अभि देवाँ २ इयक्षते । ॐ इडामग्ने पुरुद ग्वंग् स ग्वंग् सनि गोः शश्चत्तम ग्वंग् हवमानाय साध । स्यान्न सुनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ।।

अनेन नान्दीश्राद्धं सम्पन्नम्, इति यजमानः ।।

ब्राह्मणाः - सुसम्पन्नम् ।

विसर्जनम् -- (निम्न मन्त्र पढ़कर विसर्जन करें।)

ॐवाजेवाजेऽवत व्याजिनो नो धनेषु विप्राऽअमृताऽॠतज्ञाः । अस्य माध्वः पिबत मादयध्वं तप्तां यात पथिभिर्देवयानैः ।।

ॐ आ मा वाजस्य प्रसवो जगम्म्या देमे द्यावापृथिवी विश्वरूपे । आ मा गन्तां पितरा मातरा चा मा सोमोऽअमृतत्वेन गमयात् ।।

निम्न मंत्र से जल छोड़ें।

विश्वेदेवा: प्रियंताम् ।।

इति विसर्जनम्।।

## पंचभू-संस्कार -

पंचभू-संस्कार केवल मुख्य पूजन करने वाले व्यक्ति से कराया जा सकता है । अधिक व्यवस्था हो, तो मुख्य पूजन स्थल के साथ प्रत्येक तत्ववेदी के स्थल पर अथवा प्रत्येक कुण्ड पर एक व्यक्ति द्वारा एक साथ मन्त्रोच्चार के साथ यह क्रम चलाया जा सकता है।

**१-परिसमूहन** -दाहिने हाथ में कुशाएँ लेकर तीन बार पश्चिम से पूर्व की ओर या दक्षिण से उत्तर की ओर बढ़ते हुए, निम्न मन्त्र बोलते हुए बुहारें, भावना  करें कि इस क्षेत्र में पहले से यदि कोई कुसंस्कार व्याप्त है, तो उन्हें मन्त्र और भावना की शक्ति से बुहार कर दूर किया जा रहा है। बाद में कुशाओं को पूर्व की ओर फेंक दें।

ॐ दर्भैः, , परिसमूह्य, परिसमूह्य, परिसमूह्य।

**२-उपलेपन-** बुहारे हुए स्थल पर गोमय (गाय के गोबर) से पश्चिम से पूर्व की ओर को या दक्षिण से उत्तर की ओर बढ़ते हुए लेपन करें और निम्न मंत्र  बोलते रहें। भावना करें कि शुभ संस्कारों का आरोपण और उभार इस क्रिया के साथ किया जा रहा है।

ॐ गोमयेन उपलिप्य, उपलिप्य, उपलिप्य।

**३-उल्लेखन -** लेपन हो जाने पर उस स्थल पर स्रुवा- मूल से तीन रेखाएँ पश्चिम से पूर्व की ओर या दक्षिण से उत्तर की ओर बढ़ते हुए निम्न मन्त्र बोलते हुए खीचें, भावना करें कि भूमि में देवत्व की मर्यादा रेखा बनाई जा रही है।

ॐ स्रुवमूलेन उल्लिख्य, उल्लिख्य, उल्लिख्य।

**४-उद्धरण-** रेखांकित किये गये स्थल के ऊपर की मिट्टी अनामिका और अंगुष्ठ के सहकार से निम्नमन्त्र बोलते हुए पूर्व या ईशान दिशा की ओर फेंके, भावना करें कि मर्यादा में न बाँध सकने वाले तत्त्वों को विराट् की गोद में सौंपा जा रहा है।

ॐ अनामिकांगुष्ठेन उद्धृत्य, उद्धृत्य, उद्धृत्य ।

**५-अभ्युक्षण-** पुन: उस स्थल पर निम्न मत्र बोलते हुए जल छिड़के, भावना करें कि इस क्षेत्र में जाग्रत् सुसंस्कारों को विकसित होने के लिए सींचा जा रहा है।

ॐ उदकेन अभ्युक्ष्य, अभ्युक्ष्य, अभ्युक्ष्य ।

## कुशकण्डिका-

क्रिया और भावना-कुश स्थापना करने वाले व्यक्ति एक बार में चार कुश हाथ में लें। मन्त्रोच्चार के साथ कुशाओं सहित उस दिशा में हाथ जोड़कर मस्तक झुकाएँ और एक-एक करके चारों कुशाएँ उसी दिशा में स्थापित कर दें। कुश स्थापित करते समय कुश का ऊपरी नुकीला भाग पूर्व या उत्तर की ओर रहे तथा मूल (जड़) भाग पश्चिम या दक्षिण की ओर रहे । प्रत्येक मन्त्र के साथ दिशा विशेष के लिए यही क्रम अपनाया जाए।

भावना की जाए कि इस दिशा में व्याप्त देवशक्तियों को नमस्कार करते हुए उनके सहयोग से दिव्य प्रयोजन के लिए कुशाओं जैसी पवित्रता और प्रखरता का जागरण और स्थापन किया जा रहा है।

१-पूर्व दिशा में-

ॐ प्राची दिगग्निरधिपतिरसितो, रक्षितादित्या इषवः । तेभ्यो नमोऽधिपतिभ्यो नमो, रक्षितृभ्यो नमऽ इषुभ्यो, नमऽ एभ्यो अस्तु ।यो३स्मान् द्वेष्टि यं वयं, द्विष्मस्तं वो जम्भे दध्मः

२-दक्षिण दिशा में-

ॐ दक्षिणा दिगिन्द्रोऽधिपतिस्तिरश्चिराजी, रक्षिता पितरऽ इषवः । तेभ्यो नमोऽधिपतिभ्यो नमो, रक्षितृभ्यो नमऽ इषुभ्यो, नमऽ एभ्यो अस्तु ।यो३स्मान् द्वेष्टि यं वयं, द्विष्मस्तं वो जम्भे दध्मः ।

३-पश्चिम दिशा में-

ॐ प्रतीची दिग्वरुणोऽधिपतिः पृदाकू , रक्षितान्नमिषवः ।तेभ्यो नमोऽधिपतिभ्यो नमो, रक्षितृभ्यो नमऽइषुभ्यो, नमऽ एभ्यो अस्तु । यो३स्मान् द्वेष्टि यं वयं, द्विष्मस्तं वो जम्भे दध्मः।

४-उत्तर दिशा में-

ॐ उदीची दिक्सोमोऽधिपतिः, स्वजो रक्षिताशनिरिषवः । तेभ्यो नमोऽधिपतिभ्यो नमो, रक्षितृभ्यो नमऽ इषुभ्यो, नमऽ एभ्यो अस्तु । यो३स्मान् द्वेष्टि यं वयं, द्विष्मस्तं वो जम्भे दध्मः ।।

मेखलापूजनम्-

विष्णु पूजन(ऊपर की सफेद मेखला)-

ॐ इदं विष्णुर्विचक्रमे, त्रेधा निदधे पदम्। समूढमस्य पा ग्वंग् सुरे स्वाहा ।। ॐ विष्णवे नमः । आवाहयामि, स्थापयामि, पूजयामि, ध्यायामि।६४

ब्रह्मा पूजन (बीच की लाल मेखला) -

ॐ ब्रह्म जज्ञानं प्रथम पुरस्ताद, विसीमतः सुरुचो वेन ऽ आवः । सऽबुध्न्या उपमा ऽ अस्यविष्ठाः, सतश्च योनिमसतश्च विकः ।। ॐ ब्रह्मणे नमः ।आवाहयामि, स्थापयामि, पूजयामि, ध्यायामि ।

रुद्र पूजन(नीचे की काली मेखला) -

ॐ नमस्ते रुद्र मन्यवः, उतो तऽ इषवे नमः । बाहुभ्यामुत ते नमः ।। ॐ रुद्राय नमः। आवाहयामि, स्थापयामि, पूजयामि, ध्यायामि ।

## अग्निस्थापनम् -

एक चम्मच में कपूर अथवा घी में भीगी हुई रुई की मोटी बत्ती रखी जाए, उसमें अग्नि जलाकर स्थापित किया जाए। ऊपर पतली लकड़ी लगाने से अग्नि प्रवेश में सुविधा होती है।

ॐ भूर्भुवः स्वर्द्यौरिव भूना, पृथिवीव वरिम्णा। तस्यास्ते पृथिवि देवयजनि, पृष्ठेऽग्निमन्नादमन्नाद्द्यायादधे। अग्नि दूतं पुरोदधे, हव्यवाहमुपब्रुवे । देवाँऽआसादयादिह ।।

ॐ अनये नमः ।आवाहयामि, स्थापयामि, ध्यायामि।

तदुपरान्त गन्ध, अक्षत- पुष्प आदि से अग्निदेवता की पूजा करें।गन्धाक्षतम् , पुष्पाणि, धूपम् , दीपम् , नैवेद्यम् समर्पयामि।

समिधाधानम्-

यज्ञपुरुष अग्निदेव के प्रकट होने पर पतली छोटी चार समिधाएँ घी में डुबोकर एक-एक करके चार मंत्रों के साथ चार बार में समर्पित करें।

१-ॐ अयन्त इध्म आत्मा, जातवेदस्तेनेध्यस्व वर्धस्व । चेद्ध वर्धय चास्मान् प्रजया, पशुभिर्ब्रह्मवर्चसेन, अन्नाद्येन समेधय स्वाहा । इदं अग्नये जातवेदसे इदं न मम ।

२-ॐ समिधाऽग्निं दुवस्यत, घृतैर्बोधयतातिथिम्। आस्मिन् हव्या जुहोतन स्वाहा । इदं अग्नये इदं न मम ॥ ६५

३-ॐ सुसमिद्धाय शोचिषे, घृतं तीव्रं जुहोतन । अग्नये जातवेदसे स्वाहा। इदं अग्नये जातवेदसे इदं न मम॥

४- ॐ तं त्वा समिद्भिरङ्गिरो, घृतेन वर्धयामसि ।बृहच्छोचा यविष्ठ्य स्वाहा । इदं अग्नये अंगिरसे इदं न मम ।।

## जलप्रसेचनम्-

प्रोक्षणी पात्र में पानी लेकर निम्न मंत्रों से वेदी के बाहर चारों दिशाओं में डालें ।

ॐ अदितेऽनुमन्यस्व ।। (इति पूर्वे)

ॐ अनुमतेऽनुमन्यस्व ।। (इति पश्चिमे)

ॐ सरस्वत्यनुमन्यस्व ।। (इति उत्तरे)

ॐ देव सवितः प्रसुव यग्यं , प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्वः केतपूः , केतं नः पुनातु , वाचस्पतिर्वाचं नः स्वदतु ।।इति चतुर्दिय)।।६२।।

आज्याहुतिः - सर्वप्रथम सात मंत्रों से सात आहुतियाँ केवल घृत की दी जाती। स्रुवा लौटाते समय घृत पात्र के समीप ही रखे हुए, जल भरे प्रणीता पात्र में बचे हुए घृत की एक बूंद टपका देनी चाहिए।

१- ॐ प्रजापतये स्वाहा । इदं प्रजापतये इदं न मम ।।

२. ॐ इन्द्राय स्वाहा । इदं इन्द्राय इदं न मम ।।

३- ॐ अग्नये स्वाहा । इदं अग्नये इदं न मम ।।

४-ॐ सोमाय स्वाहा । इदं सोमाय इदं न मम ।।

५. ॐ भूः स्वाहा। इदं अग्नये इदं न मम ।।

६. ॐ भुवः स्वाहा । इदं वायवे इदं न मम ।।

७- ॐ स्वः स्वाहा । इदं सूर्याय इदं न मम ।।

## गायत्रीमन्त्राहुतिः-

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् स्वाहा । इदं गायत्र्यै इदं न मम ।।

**तदन्तर आवाहित सभी देवी देवताओं को आहुतियाँ पूजन के क्रम से दे कर मुख्य देवता को आहुतियाँ दें।**

## स्विष्टकृतहोमः-

सूचि (चम्मच जैसा, लम्बी डण्डी वाला काष्ठ पात्र) में मिष्टान्न और घी भरकर इसे केवल घी होमने वाला ही देता है।

ॐ यदस्य कर्मणोऽत्यरीरिचं, यद्वान्यूनमिहाकरम्। अग्निष्टत् स्विष्टकद् विद्यात्सर्व स्विष्टं सुहृतं करोतु मे। अग्नये स्विष्टकृते सुहुतहुते, सर्वप्रायश्चित्ताहुतीनां कामानां, समर्द्धयित्रे सर्वान्नः कामान्त्समर्द्धय स्वाहा। इदम् अग्नये स्विष्टकृते इदं न मम ।।

ॐ अयाश्चाग्नेऽस्यनमिशस्तिपाश्च सत्यमित्वमया ऽअसि || अयानी यज्ञ महास्यया नाधेहि भेषजम् स्वाहा ।। इदमानवे अयसे न मम ||

ॐ येते शतं वरुण ये सहस्रं यज्ञियाः पाशा बितता महान्तः ।। तेभित्रों ऽअच सवितोत विष्णुर्विश्धे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा ।। इदं वरुणाय । सचित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुभ्यः स्वर्केभ्यश्च न मम ।।७।।

ॐ उदुत्तमं वरुण पाशमस्मदवाधम चिमध्यम श्नधाय ।। अथावयमा दित्यवते तवानागसोड अदितये स्याम स्वाहा ।। इदं वरुणायादित्यादितये नगम ।।८।।

ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम ।।९।।

## बलिदानम्:-

क्षेत्रपालबलिदानम्:-

एक बांस के पात्र में पत्ता विछाकर उसमें उडद, दही, भात और जलपात्र, रखकर हलदी, सिन्दूर, कज्जल द्रव्य, पताका चौमुखा दीपक आदि रखने के बाद हाथ में अक्षत, जल पुष्प, पैसे लेकर निम्नलिखित संकल्प बोलें--

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य, अद्य श्रीब्रह्मणोन्हि द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे, वैवस्वतमन्वन्तरे, भूर्लोके, जम्बूद्वीपे, भारतवर्षे, भरतखण्डे, आर्यावर्तैकदेशान्तर्गते, ..... क्षेत्रे,... विक्रमाब्दे ,.... संवत्सरे, मासानां मासोत्तमेमासे..... मासे ..... पक्षे ..... तिथौ ..... वासरे ...... गोत्रोत्पन्नः ...... नामाऽहं सत्प्रवृत्ति-संवर्द्धनाय, ६७दुष्प्रवृत्तिउन्मूलनाय, लोककल्याणाय, आत्मकल्याणाय, वातावरणपरिष्काराय, उज्ज्वलभविष्यकामनापूर्तये च प्रबलपुरुषार्थ करिष्ये, अस्मै प्रयोजनाय च
ममः कलारिष्टशान्तिपूर्वक प्रारब्धकर्मण साङ्गतासिद्ध्यर्थञ्च क्षेत्रपालपूजनमं बलिदानञ्च करिष्ये ।

अथ क्षेत्रपालबलिदानमन्त्र -

ॐ क्षेत्रापल महावाहो महाबलपराक्रम ।

क्षेत्राणां रक्षाणार्थाय बलिं नय नमोऽस्तुते ।।

ॐ क्षौं क्षेत्रपालाय सांगाय भूतप्रेतपिशाचडाकिनीशाकिनीवेतालादिपरिवारसहिताय सायुधाय सशक्तिकाय सवाहनाय इमं सचतुर्मुखदीपदधिभक्तवबलिं समर्पयामि ।

ऐसा बोलकर प्रार्थना करें -

भो क्षेत्रपाल क्षेत्रं रक्ष बलिं भक्ष मम सकुटुम्बस्य आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव ।

अनेन बलिदानेन क्षेत्रपाल: प्रीयन्ताम् न मम ।

किसी नौकर आदि के द्वारा बलि को चौरास्ते पर रखवा दें बलि ले जाने वाले व्यक्ति के पीछे दरवाजे तक जल के छीटें दें और “द्यौः शान्ति” इत्यादि मन्त्र बोलें।

देवदक्षिणा-पूर्णाहुतिः:-

सबके हाथ में एक-एक चुटकी सामग्री हो । घृत होमने वाले सुचि में सुपारी अथवा नारियल का गोला तथा घृत लें, स्वाहा के साथ आहुति दें।

ॐ पूर्णमदः पूर्णमिदं , पूर्णात् पूर्णमुदच्यते।

पूर्णस्य पूर्णमादाय, पूर्णमेवावशिष्यते ।।

ॐ पूर्णादर्वि परापत, सुपूर्णा पुनरापत।

वस्नेव विक्रीणा वहा, इषमूर्ज ग्वंग् शतक्रतो स्वाहा ।।

ॐ सर्वं वै पूर्ण ग्वंग्  स्वाहा।

## वसोर्धारा:-

वसोर्धारा में घृत की अविच्छिन्न धारा टपकाई जाती है और अधिक घृत होमा जाता है ।

ॐ वसो: पवित्रमसि शतधारं, वसो: पवित्रमसि सहस्रधारम्।

देवस्त्वा सविता पुनातु वसोः, पवित्रेण शतधारेण सुप्वा, कामधुक्षः स्वाहा।६८

**नीराजनम्:** - थाली में पुष्पादि से सजाकर आरती जलाएँ, तीन बार जल घुमाकर यज्ञ भगवान् व देव प्रतिमाओं की आरती उतारें, पुन: तीन बार जल घुमाकर उपस्थित जनों तक आरती पहुँचा दें। ।

ॐ यं ब्रह्मवेदान्तविदो वदन्ति, परं प्रधानं पुरुषं तथान्ये ।

विश्वोद्गते: कारणमीश्वरं वा, तस्मै नमो विघ्नविनाशनाय ।।

ॐ यं ब्रह्मा वरुणेन्द्ररुद्रमरुत: , स्तुन्वन्ति दिव्यैः स्तवैः,

वेदैः सांगपदक्रमोपनिषदै, गायन्ति यं सामगाः ।।

ध्यानावस्थित-तद्गतेन मनसा, पश्यन्ति यं योगिनो,

यस्यान्तं न विदुः सुरासुरगणाः , देवाय तस्मै नमः ।।

## घृतावघ्राणम्:-

घृत आहतियों से बचने पर टपकाया हुआ घृत, जल भरे प्रणीता पात्र में जमा रहता है। इस जल मिश्रित घृत में दाहिने हाथ की अंगुलियों के अग्रभाग को डुबोते जाएँ और दोनों हथेलियों पर मल लिया जाए। मंत्र बोलते समय दोनों हाथ यज्ञ कुण्ड की ओर इस तरह रखें, मानों उन्हें तपाया जा रहा हो ।यज्ञ भगवान् का प्रसाद घृत अवधाण से प्राप्त होता है।

ॐ तनूपा अग्नेऽसि, तन्वं मे पाहि।

ॐ आयुर्दा अग्नेऽसि, आयुर्मे देहि ।।

ॐ वर्चोदा अग्नेऽसि, वर्चो  मे देहि ।

ॐ अग्ने यन्मे तन्वाऽ, ऊनन्तन्मऽआप्रिण ।।

ॐ मेधां मे देवः, सविता आदधातु।

ॐ मेधां मे देवी, सरस्वती आदधातु ।।

ॐ मेधां मे अश्विनी, देवावाधत्तां पुष्करस्रजौ।

## भस्मधारणम्:-

सभी लोग अनामिका अंगुली में भस्म लेकर मन्त्र में बताये हुए स्थानों पर क्रमश: भस्म लगाते हैं। ॐ त्र्यायुषं जमदग्नेः, इति ललाटे।

ॐ कश्यपस्य त्र्यायुषम्, इति ग्रीवायाम्।

ॐ यद्देवेषु त्र्यायुषम्, इति दक्षिणबाहुमूले।

ॐ तन्नो अस्तु त्र्यायुषम्, इति ह्रिदि।

## क्षमा प्रार्थना :-

ॐ आवाहनं न जानामि, नैव जानामि पूजनम्।

विसर्जनं न जानामि, क्षमस्व परमेश्वर ! ॥१॥

मंत्रहीनं क्रियाहीनं, भक्तिहीनं सुरेश्वर!

यत्पूजितं मया देव! परिपूर्ण तदस्तु मे ॥२॥

## साष्टांगनमस्कारः:-

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये, सहस्रपादाक्षिशिरोरुबाहवे।

सहस्रनाम्ने पुरुषाय शाश्वते, सहस्रकोटीयुगधारिणे नमः ।।

## शुभकामना:-

ॐ स्वस्ति प्रजाभ्यः परिपालयन्तां, न्याय्येन मार्गेण महीं महीशाः ।

गोब्राह्मणेभ्यः शुभमस्तु नित्यं, लोकाः समस्ताः सुखिनो भवन्तु ।।

सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु , मा कश्चिद् दुःखमाप्नुयात् ।।२।।

## पुष्पांजलिः:-

ॐ यज्ञेन यज्ञमयजन्त देवाः, तानि धर्माणि प्रथमान्यासन्।

ते ह नाकं महिमानः सचन्त, यत्र पूर्वे साध्याः सन्ति देवाः ।।

ॐ मन्त्रपुष्पाञ्जलिं समर्पयामि।

## शान्ति- अभिषिंचनम्:-

ॐ द्यौः शान्तिरन्तरिक्ष ग्वंग् शान्तिः, पृथिवी शान्तिरापः, शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः, शान्तिब्रह्मशान्तिः , सर्व ग्वंग् शान्तिः, शान्तिरेव शान्तिः , सा मा शान्तिरेधि ।। ॐ शान्तिः, शान्तिः, शान्तिः । सर्वारिष्टसुशान्तिर्भवतु ।।

## सूर्याघ्यर्दानम्:-

सूर्य की ओर मुख करके कलश का जल धीरे-धीरे धार बाँधकर छोड़ना चाहिए।

ॐ सूर्यदेव ! सहस्रांशो, तेजोराशे जगत्पते।

अनुकम्पय मां भक्त्या, गृहाणाघ्यँ दिवाकर।। ७०

ॐ सूर्याय नमः, आदित्याय नमः, भास्कराय नमः ।।

## प्रदक्षिणा:-

सब लोग दायें हाथ की ओर घूमते हुए अपने स्थान पर खड़े रहकर चारों दिशाओं में घूमकर एक परिक्रमा करें।

ॐ यानि कानि च पापानि, ज्ञाताज्ञातकृतानि च।

नि सर्वाणि नश्यन्ति, प्रदक्षिण- पदे-पदे ।।

## विसर्जनम्:-

ॐ गच्छ त्वं भगवन्नग्ने, स्वस्थाने कुण्डमध्यतः ।

हुतमादाय देवेभ्यः, शीघ्रं देहि प्रसीद मे॥

गच्छ गच्छ सुरश्रेष्ठ, स्वस्थाने परमेश्वर !

यत्र ब्रह्मादयो देवाः , तत्र गच्छ हुताशन !

यान्तु देवगणाः सर्वे, पूजामादाय मामकीम्।

इष्टकामसमृद्ध्यरर्थं , पुनरागमनाय च।

अन्त में प्रसाद वितरण के साथ कार्यक्रम समाप्त किया जाए।

।।ॐ।।